ISSN No.:2278-0815

# भास्करोदयः

संदर्भित ज्योतिष-शोधपत्रिका

Referred Research Journal of Jyotish

## षोडशोऽङ्कः

सत्रम् 2018–19

सम्पादकः

**प्रो.मदनमोहनपाठकः**

आचार्योऽध्यक्षश्च (Professor & Head) ज्यौतिषविभागः

राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ-परिसरः, विशालखण्डः-४, गोमतीनगरम्
लखनऊ - २२६०१० (उ०प्र०)

नवदेहलीस्थितस्य राष्ट्रियसंस्कृतसंस्थानस्य (मानित-विश्वविद्यालयस्य) अनुदानेन प्रकाशितः

## भास्करोदयपत्रिकायाः प्रथमं लोकार्पणम् :-



लोकार्पणं कुर्वन्तः
केन्द्रीयसर्वकारस्य मानव-
संसाधनविकासमन्त्रालयेन
सञ्चालितस्य नवदेहलीस्थितस्य
राष्ट्रियसंस्कृतसंस्थानस्य
निदेशकाः
प्रो.वेम्पटिकुटुम्बशास्त्रिमहोदयाः

दिनाङ्कः- १८जनवरी २००१
स्थानम्- श्री.स.शि.के.सं.विद्यापीठम्, पुरी

## भास्करोदयपत्रिकायाः अष्टम-अङ्कस्य लोकार्पणम् :-



लोकार्पणं कुर्वन्तः
नवदेहलीस्थितस्य
राष्ट्रियसंस्कृतसंस्थानस्य
शास्त्रसंवर्धकाः कुलपतयः
श्रीमन्तः प्रो.राधावल्लभत्रिपाठीमहोदयाः

पार्श्वे सन्ति गरलीपरिसरस्य
तत्कालीनप्र.प्राचार्याः
प्रो.के.बी.सुब्बरायुडुमहोदयाः

राष्ट्रपतिसम्मानिताः
आचार्याःरामचन्द्रपाण्डेयमहोदयाः

दिनाङ्कः- २६ फरवरी २०११
स्थानम्- रा.सं.संस्थानम्, गरली-परिसरः

# भास्करोदयः

**Referred Research Journal of Jyotish**

**षोडशोऽङ्कः-** सत्रम्- 2018 - 19

**संरक्षकः- प्रो.परमेश्वरनारायणशास्त्री**

कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**सम्पादकः**

**प्रो.मदनमोहनपाठकः,** आचार्येऽध्यक्षश्च **(Professor & H.O.D.) ज्यौतिषविभाग:**

राष्ट्रियसंस्कृतसंस्थानम्, लखनऊपरिसरः, लखनऊ- 226010 (उ.प्र.)

**सत्प्रेरकाः**

**डॉ.हरिहरझाः,** पूर्वप्राचार्यः, श्रीसदाशिवपरिसरः **प्रो.रामचन्द्रझाः-** भू.पू.कुलपतिः, का.सिं.सं.वि.वि., दरभङ्गा
**प्रो.रमाकान्तशुक्लः,** आचार्योऽध्यक्षचरः, संस्कृत-विभाग: **D.U.** **प्रो.शिवाकान्तझाः,** भू.पू. कुलपतिः, नालन्दामुक्त वि. वि. पटना,
**प्रो.रामचन्द्रपाण्डेयः** भू.पू.ध.वि.सङ्कायप्रमुख: **B.H.U** **प्रो. अर्कनाथचौधरी,** भू.पू.कुलपतिः, श्रीसो.ना.सं.वि.वि., गुज.
**प्रो.विजयकुमारजैनः,** प्र.प्राचार्यः, रा.सं.संस्थानम्, लखनऊ, **प्रो.वासुदेवशर्मा** प्र.प्राचार्य: जम्मू-परिसरः,
**प्रो.सर्वनारायणझाः,कुलपतिः**, का.सिं.सं.वि.वि., दरभङ्गा **प्रो.राधाकान्तठाकुरः,** आचार्यः, ज्यौ.विभागः.तिरुपतिः

**सम्पादनसहायकाः-**

डॉ.ज्योतिप्रसाददाशः, डॉ.शैलेशकुमारतिवारी, डॉ.उमेशकुमारपाण्डेयः, डा.नरेशशर्मा, श्रीवेदप्रकाशपाठकः,
श्रीआनन्दप्रकाशपाठकः

**Adviser :- Sri Anurag Awasthi & Co C.A.** Kanpur U.P.

**प्रकाशकः-**
**सम्पादक-भास्करोदयः,** ज्योतिर्विज्ञान-अनुसन्धान-केन्द्रम्
**वेदानन्द-आश्रमः ( www.vedanandashram.in )** खरगापुर, नजदीक-महेशकम्पलेक्स,
गोमतीनगरम्, लखनऊ- 226010 (उ.प्र.)

**लेखपर्यवेक्षक-मण्डलम्**

| **प्रो.सर्वनारायणझाः,** | **प्रो.देवीप्रसादत्रिपाठी,** | **प्रो. ईश्वरभट,** | **प्रो. विजयकर्णः** |
|---|---|---|---|
| कुलपतिः | कुलपतिः | परीक्षानियन्त्रकः | संस्कृतविभागाध्यक्षः |
| का.सिं.सं.वि.वि.दरभंगा, | उत्तराखण्डसं.विश्वविद्यालय | रा.सं.संस्थानम् | विद्यान्तहिन्दूपरास्नातक- |
| बिहार -८४६००४ | हरिद्वार- २४९४०२ | नईदल्ली-५८ | महाविद्यालयः लखनऊ-०९ |


**प्रकाशक -**

**सम्पादकः, भास्करोदयः**
**ज्योतिर्विज्ञान-अनुसन्धान-केन्द्रम्**
**वेदानन्द-आश्रम, खरगापुर, नजदीक- महेश काम्प्लेक्स**
**गोमतीनगरम, लखनऊ-२२६०१० (उ.प्र.)**

**संस्करणम् –**

**प्रथमसंस्करण – २०००-०१**
**षोडश संस्करण - २०१८-१९**

**मुद्रकः**

गणपति प्रिन्टर
29-कन्हैयाकुँज विहार, बाराबिरवा, आलमबाग
लखनऊ - २२६०१० (उत्तर प्रदेशः)

**© सम्पादकः**

**प्रो.मदनमोहनपाठकः**

मोबा. ७००७७९७८१३, ९४५५४३७०६६ **e-mail-** pathak_guruji@rediffmail.com
**www.vedanandashram.in**

## सम्पादकीयम्


महाप्रभोर्भगवतो जगन्नाथस्यानुकम्पया भास्करोदयस्यास्य षोडशमङ्कं भवतां शास्त्रानुरागिणान्तत्रापि विशेषेण ज्योतिषशास्त्र-जिज्ञासूनां ज्योतिषविभागीयानुसन्दिधित्सूनाञ्च करकमलयोः प्रदाय प्रसन्नतामनुभवामि। पत्रिकाया अस्याः प्रयोजनं ज्योतिषविभागीयच्छात्राणां लेखनकलायाः विकासेन सह तेषु परम्परागतज्यौतिषशास्त्रस्य प्रचारः प्रसारश्च वर्तते। अनेन छात्रा उपकृतास्तु भवन्त्येव सहैव प्रसरति ज्योतिषशास्त्रस्य ज्योतिः गृहे-गृहे, जने-जने।

अस्तु, इयं पत्रिकापि लेखकानां भाववाहिका विशेषेण देवभाषया ज्योतिर्विज्ञानस्य ज्योतिप्रसारिका वर्तते। पत्रिकायाः अस्याः गुणात्मकं स्वरूपमभिवर्धयितुं ते सर्वेऽपि वन्दनीया विद्वांसः प्रसङ्गेस्मिन् संस्मरणीयास्सन्ति येषां सर्वविधं सहयोगं सप्राप्य भास्करोदयोऽयं संस्कृतमाध्यमेन परम्परागतज्यौतिष-जिज्ञासूनां सकलं मनोभिलषितं पूरयन्नस्ति। अस्मिन् सारस्वतयज्ञकर्मणि बहूनां महानुभावानां सर्वविधसहयोगो भवति अपेक्षितः। तेषु सर्वप्रथमं संस्मर्यन्ते राष्ट्रियसंस्कृतसंस्थानस्य कुलपतयः शास्त्रमूर्त्तयः **प्रो.परमेश्वरनारायणशास्त्रिमहोदयाः** येषां चिरकालादेव सततप्रोत्साहनेन, आशीःप्रदानेन च एतादृशः सारस्वतो यज्ञः सम्पन्नतां याति। अनन्तरं स्मर्यन्ते संस्थानमुख्यालयस्य कुलसचिवाः **प्रो.एस्.सुब्रह्मण्यशर्ममहोदयाः**, मुक्तस्वाध्यायपीठस्य मान्याः निदेशकाः प्रो.रमाकान्तपाण्डेयवर्याः, लखनऊपरिसरस्य प्र.प्राचार्याः प्रो.विजयकुमारजैनमहोदयाः, विभागीयाः सर्वेऽपि आचार्याः, सत्प्रेरकाः सुधयः, सहायकसम्पादनसमितेः सदस्याः, परिसरस्य सर्वेऽपि प्रोत्साहकाः सहकर्मिणः येषां सर्वदा सोत्साहं सहयोगो मया प्राप्यते, तेषां समेषां कृते अहं साभारं कृतज्ञतां प्रकटयामि। एवमेव वन्दनीयाः लेखकाः, आयुष्मन्तश्छात्राश्च, विशेषेण धन्यवादार्हास्सन्ति। अतः सर्वेभ्यो धन्यवादराशीन् वितीर्य भगवते जगन्नाथाय, जगदम्बायै च प्रणामाञ्जलीन् विनिवेद्य विरमामि विस्तरादिति शम्।

विद्वच्चरणचञ्चरीको

शिवरात्रि, संवत् 2075, (मदनमोहनपाठकः)

04 मार्च 2019 सोमवासरः



# विषयानुक्रमणिका


| क्र.सं. विषयः | नाम | पृष्ठसंख्या |
|---|---|---|
| शुभसम्मतयः | | 5 - 8 |
| अक्षांशविमर्शः | प्रो. मदनमोहनपाठकः | 9 - 13 |
| स्वरशास्त्रस्य व्यवहारिकः पक्षः | डॉ. ज्योतिप्रसाददाशः | 14-19 |
| भ्रष्टाचारनिवारकं ज्योतिषशास्त्रम् | डॉ. दीपकुमारः | 20-27 |
| अधिशेषविमर्शः | वरुणकुमारझाः | 28-34 |
| सोदाहारणं दिनगणसाधनम् | आनन्दप्रकाशपाठकः | 35-40 |
| द्वादशभावैः सह रोगाणां सम्बन्धः | डॉ. शैलेशकुमारतिवारी | 41-48 |
| यत्ब्रह्माण्डे तत् पिण्डे | डॉ. विकासः | 49-54 |
| व्यक्तित्वविकासे ज्योतिषशास्त्रस्यावधारणा | डॉ. सन्तोषडोगरा | 55-61 |
| वेदेषु ज्योतिषशास्त्रम् | प्रकाशरंजनमिश्रः | 62-64 |
| ग्रहणविवेचनम् | कुन्दनकुमारझा | 65-69 |
| फलप्रदाने भावानां शुभाशुभत्वम् | डॉ. अरुणकुमारः | 70-79 |
| इन्द्वोर्कग्रहणमीमांसा | विभामिश्रा | 80-82 |
| जातकफलादेशप्रसंगे पञ्चवर्गीयबलस्यभूमिका | वेदप्रकाशपाठक | 83-85 |
| लखनऊपरिसरीय-ज्योतिष-विभागस्य गतिविधयः (सत्रम्-2018-19) | प्रो. मदनमोहनपाठकः | 86-95 |
| संस्कृत-संस्कृतिसंरक्षणसम्वर्धनसम्बन्धिविभिन्नकार्यक्रमेषु सम्पादकस्यावदानम् | | 96 |


**प्रो. रामचन्द्रझाः**
कुलपतिः
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः
कामेश्वरनगरम्, दरभङ्गा- 846008
दूरभाषः- 09430063648
e-mail- varunkjha87@gmail.com

# शुभाशंसनम्

2000-01 तः प्रकाशमानां नाम्नीमिमां ज्योतिषशोधपत्रिकां दृष्ट्वा नितरां प्रसीदति मे मनः। अत्र विदुषां गवेषकानां छात्राणाञ्च शास्त्रीया लेखा जिज्ञासूनां कृते समुपकाराय विलसन्ति। ज्ञानार्जने पत्रिकायाः महत्त्वपूर्णं स्थानं विद्यते सत्वष्वपि बहुविधेषु ज्ञानसाधनोपकरणेषु । भारतीयविद्यासु ज्योतिषशास्त्रस्य महत्त्वपूर्ण स्थानं विद्यते। सर्वविधलौकिकपारलौकिककार्यसम्पादनाय मानव-जीवनगतशुभाशुभफल ज्ञानाय च वेदस्य चक्षुरूपात्मकं शास्त्रमिदं परमोपयोगि विद्यते ।

एवम्भूतं ज्यौतिषशास्त्रीयविषयमादायान्वर्थनाम्नी पत्रिकेयं भास्करवद् भासमाना जगतां कल्याणाय जायतां जानकीजानिकृपयेति शम् ।

-इत्याशास्ते
**विदुषामनुचरो**



दिनाङ्कः५/८/२०१३
श्रावणकृष्ण-मासशिवरात्रिः
सोमवासरः
विक्रमाब्दः२०७०

**प्रो.अर्कनाथचौधरी**
**प्राचार्यः,** राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ-परिसरः
विशालखण्ड-४, गोमतीनगरम्
लखनऊ -२२६०१० (उ.प्र.)

## भास्वानुदेष्यति

षट्त्सु वेदाङ्गेषु ज्योतिषं शास्त्रं परब्रह्मणो निच्छवसितस्य वेदशरीरस्य चक्षुरिति पाणिनिः स्वशिक्षाग्रन्थे उल्लिलेख। तदेव वयमपि मन्यामहे। नेत्रं विना अन्धो भवति जनः। लोकयात्रारूपे विषमे मार्गे धावन् कश्चिदपि अन्धः पतत्यवश्यम्। किन्तु नेत्राङ्ग-रूपिज्योतिषशास्त्रज्ञो विषमेऽपि लोकयात्रामार्गे न पतति । यतोहि-

"प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ" इत्यस्माकमृषीणामुद्घोषः। प्रकाशपुञ्जयोः साक्षिभूतयोः समवस्थाने क्वान्धता? कस्यान्धता? न कस्यापि । पुनश्च "इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति" ज्ञानसिद्धान्तानुसारेणापि प्रकाशरूपेन्द्रियस्य अर्थस्य च सन्निकर्षेण यल्लब्धं ज्ञानमनन्तं प्रामाणिकं तदेव ज्योतिषं प्रकटयतीति महत्त्वा-तिशयमस्त्येव लोकजीवनेऽस्य शास्त्रस्य। एतादृशस्य शास्त्रस्य विषये अनुदिनमनुसन्धान-माचरन्तो दृश्यन्ते विज्ञाः। राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य लखनऊ-परिसरस्थः ज्योतिषशास्त्रमर्मज्ञो व्यवहार कुशलो ज्योतिषविभागाध्यक्षः प्रो.मदन मोहनपाठक भास्करोदयः इति नाम्ना ज्योतिषशोधपत्रिकां लोकाय समर्पयन् भृशमुपकारं जनयति पाठकानां सुधियां छात्राणाञ्चेति परिसरपक्षतोऽस्मत्पक्षतश्च साधुवादार्हः। मन्ये स्युरत्र बह्वो लेखाः विदुषां शोधार्थिनाञ्च। एतैः लेखैः उदितो भास्वान् सर्वदैवोदितः स्थास्यतीति विश्वासः। तथापि लोकव्यवहारोपयोगिनो लेखाः अस्मिन्नङ्के भाविन्यङ्के चावश्यं योज्या: विदुषा सम्पादकेन प्रो.पाठकमहोदयेनेत्यनुरोधः। शतं जीव्यान्मदनमोहन-पाठक इति मदीयं शुभाशंसनम्।

**प्रो.अर्कनाथचौधरी**

दिनाङ्कः -१५/१०/२०१३
संवत् २०७० पापाङ्कुशैकादशी, भौमवासरः


**प्रो.विश्वमूर्त्तिशास्त्री** प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम्, गरली-परिसरः
गरली, काँगडा (हि.प्र.)
Phone : (01970) 245409 (O), 245763 (R)

# भास्करोदयः

संस्कृतस्य प्रचाराय ज्यौतिषस्य विशेषतः ।
यत्नः सर्वात्मना साध्यस्तदर्थं भास्करोदयः ।।
महिमा भास्करस्यात्र सर्वैर्जेगीयते बुधैः ।
समेषां मङ्गलं कुर्वन् भासतां भास्करोदयः ।।
ज्योतिर्विदां शुभाशीर्भिर्देवानामनुकम्पया ।
सर्वदा देवभाषायां राजतां भास्करोदयः ।।
महत्त्वं ज्योतिषस्यात्र प्रस्तोतुं जगतीतले ।
जातो हिमाचलाकाशे गरल्यां भास्करोदयः ।।
हिताय सर्वलोकानां छात्राणाञ्च विशेषतः ।
अस्मिन् परिसरे भायात् सर्वदा भास्करोदयः ।।
यस्य प्रवर्त्तको विज्ञो मान्यो मदनमोहनः ।
असौ सर्वमनः पद्मं मोदयेद् भास्करोदयः ।।

**विदुषामनुचरो**

**विक्रमाब्दः २०६२, श्रावणशुक्लपूर्णिमा** **प्रो.विश्वमूर्तिशास्त्री**



**प्रो.सर्वनारायणझाः**
**कुलपतिः**
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः
दरभङ्गा-८४६००८ (बिहार)
दूरभाष-८४४७९७५२१३८
e.mail – snjha62@gmail.com

।। ॐ नमश्चण्डिकायै ।।

शुभाशंसनम्

**दैवं फलति सर्वत्र न विद्या न च पौषम्। समुद्रमथनाल्लेभे हरिर्लक्ष्मीं हरो विषम्।।**

अथ च -**प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता।**
**अवलम्बनाय दिनभर्त्तुरभून्न पतिष्यतः करसहस्रमपि।।**

किञ्च- **गुणोऽपि दोषतां याति वक्रीभूते विधातरि।**
**सानुकूले पुनस्तस्मिन् दोषोऽपि च गुणायते।**

अपि च - **भाग्यक्रमेण हि धनानि भवन्ति यान्ति ।**

इत्थं यस्य दैवस्य एतावन्माहात्म्यं गायन्ति मनीषिणस्तस्य ज्ञानं येन शास्त्रेण भवति तच्छास्त्रं नाम ज्योतिषमिति वयं जानीमः। तज्ज्ञातुं त्रिस्कन्धज्योतिषशास्त्रस्याध्ययनमध्यापन-मन्वेषणमनिवार्यम्।

राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरस्य ज्योतिषविभागाध्यक्ष आचार्यः मदनमोहन-पाठक अध्ययनाध्यापनलेखानुसन्धानेऽतितरामनुरक्तः सन् अनुसन्धित्सूनां छात्राणां हिताय भास्करोदयनाम्निं शोधपत्रिकामपि प्रकाशयतीति नितरां मोदते मे मनः। पत्रिकेयं सम्पादकश्च सुतरां त्विष्यादिति मे शुभाशंसा।

**प्रो.सर्वनारायणझाः**

दिनाङ्कः-१४/०२/२०१८
संवत् २०७४ महाशिवरात्रिः, बुधवासरः

# अक्षांशविमर्शः

**प्रो. मदनमोहनपाठकः**
आचार्योध्यक्षश्च ज्योतिषविभागे
राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ-परिसरः
e-mail:- profmmpathak@gmail.com

*चतुर्दश विद्या[१] में ज्योतिषविद्या का महनीय स्थान है। ज्योतिषविद्या न केवल व्यष्टिगत शुभाशुभफल का अभिव्यजक-शास्त्र है अपितु यह व्यष्टिगत फलादेश का भी अभिव्यञ्जक शास्त्र है। इसके विना न किसी स्थान का ज्ञान हो सकता है अपितु दिशा व काल का ज्ञान भी नहीं हो सकता। [२] इस पृथिवी पर हमारा स्थान कहाँ है? अथवा हम कहां हैं? इसका ज्ञान या तो अक्षांश [३]से हो सकता है अथवा देशान्तर [४] व रेखांश से। यहां यह ध्यातव्य है कि हमारे प्राचीन महर्षि-गण आकाशीय ग्रहों के सञ्चारवशात् इस भूगोल पर घटने वाली घटनाओं के दिशा-स्थान व काल के परिज्ञान-निमित्त ज्योतिष शास्त्र के सैद्धान्तिक पक्ष का उपयोग करते थे। जिसका आधुनिक उपयोग वैज्ञानिक लोग Longitude & Latitude के रूप में करते हैं। आज वायुयान का संचालन हो जलयान का संचालन, पृथिवी पर भौगोलिक स्थिति का परिज्ञान हो अथवा जलवायु का परिज्ञान सभी जगह अक्षांश व देशान्तर के परिज्ञान के विना हमारा कार्य सुगमता पूर्वक सम्पन्न नहीं हो सकता। प्रकृत शोध लेख में इस विषय पर व्यापक चर्चा की गई है।*

ज्योतिषशास्त्रस्य माहात्म्यं सुविदितमेव विदुषाम्। वैयक्तिकस्य फलस्य परिज्ञानं भवतु, सामूहिकस्य फलस्य परिज्ञानं वा, भौगोलिकस्थितेः परिज्ञानं भवतु

---

१. अंगानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। धर्मशास्त्रं पुराणं च विद्या ह्येता चतुर्दश:।।

२. जगुर्विदोदः किल कालतन्त्रं दिग्देशकालावगमोत्र यस्मिन्।
त्रिप्रश्ननाम्नि प्रचुरोक्तधाम्नि ब्रुवेधिकारं तमशेषसारम्।। सि.शि. त्रिप्रश्ना. श्लो. सं. 1

३. स्वखमध्यात् निरक्षखमध्यपर्यन्तम् अक्षांशो भवति।

४. रेखादेशात् स्वदेशस्य पूर्वापरमन्तरं देशान्तरम् उच्यते।

दिव्यान्तरिक्षभौमोत्पतविषयकं ज्ञानं वा सर्वत्र ज्योतिषशास्त्रमेव शरणमस्माकम्। एवं विशिष्टस्यास्य ज्योतिषशास्त्रस्य सिद्धान्त-संहिता-होरेति त्रयः प्रमुखा: स्कन्धा: सन्ति।[1] सिद्धान्ते यत्र त्रुट्यादिप्रलयान्तकालस्य कलनव्यवस्था सिद्धान्तस्कन्धे विश्लेषिता:[2] सन्ति तत्रैव व्यष्टिगतस्य फलस्य प्रतिपादनं होरास्कन्धस्य महिमानमभिवर्धयन्ति। तथैव संहितायां व्यष्टिगतस्य समष्टिगतस्य च फलं विस्तरेण प्रतिपादितमस्ति।[3] प्राकृतोऽयम् अक्षांशविमर्शेति विषयः सिद्धान्तस्कन्धेन सम्बद्धः। अत: प्रबन्धेऽस्मिन् अक्षांशविषयस्य चर्चा विधाष्यते। इदानीम् अक्षांशस्वरूप-मुच्यते। तद्यथा-

**अक्षांशशब्दः यौगिकशब्दोस्ति। यथा कालस्य अंशः कालांशः,फलस्य अंशः फलांश: तथैव अक्षस्य अंशः अक्षांश इति। अक्षो नाम तत् निर्दिष्टं स्थानं यस्य चतुर्दिक्षु: अस्माकं लोकव्यवहारः प्रचलति। हिन्द्यां तादृशं स्थानं धुरी इति कथ्यते।** अक्ष् + अच् = अक्ष:। अथवा अश् + स: अक्ष:। आभ्यां धातुभ्यां अक्षशब्दस्य निर्माणं भवितुमर्हति। इह भूमण्डले आकाशे वा एकस्मात् स्थानात् अपरस्य स्थानस्य अंशान्तरमन्तरमवगन्तुम् अक्षांशस्य प्रयोगो भवति।

प्राचीनाचार्याणां मतानुसारं खस्था: सर्वेऽपि पिण्डा: गोलमयाः। तान् गोलान् परिज्ञापयितुं अंशानामुपयोग: कृतो विद्यते। एकस्य गोलस्य मण्डलस्य वा परिमाणं षष्ट्युत्तरं त्रिशतमंशा: (३६० अंशा:) भवन्ति। एतत् मण्डलं वृत्तं वा भागचतुष्टयेन विभज्य सर्वमपि खगोलीयं भूगोलीयं वा गणितं कृतं भवति।

---

[1] . सिद्धान्तसंहिता होरा रूपस्कन्धत्रयात्मकम् । विनैतखिलं कर्म श्रौतस्मार्त न सिद्ध्यति ।।

[2] . सि.शि. मध्यमा. श्लो.सं. ६

[3] . बृहत्संहिता श्लो.सं. १/९

अस्मादेव कारणात् नवति (९०) अंशानां एकं एकं पदं भवति। तत्तत् पदस्य मानं रशित्रयात्मकं, ज्यायां तु ३४३८ परिमितं भवति।

अक्षांशो नाम निरक्षखमध्य-स्वखमध्ययोर्याम्योत्तरमन्तरम्। अर्थात् उर्ध्वाधः खमध्यगतं द्वयो: ध्रुवयोर्गतं वृतं याम्योतरवृत्तम्। तस्मिन् याम्योत्तरवृते निरक्ष-खमध्य-स्वखमध्ययोर्याम्योत्तरमन्तरम् अक्षांशो भवति। तस्मिन्नेव याम्योत्तर वृते समस्थान-ध्रुवस्थानयोरन्तरम् अक्षांशा: भवन्ति[1]।

अक्षांशस्य आनयनार्थं समग्रेषु सिद्धान्तस्कन्धस्य ग्रन्थेषु विस्तरेण चर्चा कृता विद्यते। तद्यथा सूर्यसिद्धान्ते [2] -

**शङ्कुछाया हते त्रिज्ये विषुवत्कर्णभाजिते**
**लम्बाक्षज्ये तयोश्चापे लम्बाक्षौ दक्षिणौ सदा ।।**

अर्थात् त्रिज्यया शंकुमानं पलभामानञ्च पृथक्-पृथक् संगुण्य विषुवत्कर्णमानेन पृथक्-पृथक् विभाज्यते तदा (उत्तरगोले अवस्थितानां जनानां कृते) लम्बज्या अक्षज्या च क्रमश: भवति। अत्रेदमवधेयं यत् अत्र अक्षांशस्य य: आनयनप्रकार: प्रदर्शितो विद्यते स: पलभासाधनद्वारा। पलभातु सायनमेषादौ तुलादौ च अवस्थिते भास्करे मध्याह्नकालिकद्वादशाङ्गुलशङ्को: छायावशादेव ज्ञायते। अन्यस्मिन् दिवसे अक्षांशज्ञानम् अभीष्टं स्यात् तदा तद्दिवसस्य मध्याह्नकालिकीद्वादशाङ्गुलशङ्कोश्छायावशादपि अक्षांशज्ञानं कर्तुं शक्यते।

---

[1] याम्योत्तरे तथाक्षांशाः समस्थान-ध्रुवान्तरे। खस्वतिकान्निरक्षीय-खमध्यं यावदंशका: ।। - इति गोलपरिभषा

[2] सू.सि.त्रि.श्लो- 13

तद्यथा -

**मध्यच्छाया भुजस्तेन गुणिता त्रिभमौर्विका ।**
**तत्कर्णाप्तधनुर्लिप्ता नतास्ता दक्षिणे भुजे ।।**
**उत्तराश्चोत्तरे याम्यास्तत्सूर्यक्रान्तिलिप्तिका ।**
**दिग्भेदे मिश्रितास्साम्ये विश्लिष्टाश्चाक्षलिप्तिका।।**[१]

अर्थात् यस्य कस्यापि अभीष्टदिवसस्य मध्याह्नकालिकीद्वादशांगुल-शंकोश्छाया भुज: कथ्यते। अयं भुज: त्रिज्यया संगुण्य मध्याह्नकालिकछाया-कर्णेन विभाज्य धनु: क्रियते तदा सूर्यस्य मध्याह्नकालिकनतांशो भवति। अत्र छाया दक्षिणा भवति तदा नतांश: उत्तरदिशाया:, यदि छाया उत्तरदिशायास्तदा नतांश: दक्षिणदिशाया: भवति। तत्र नतांश: क्रान्तिश्च समानदिशाया: भवेत्तदा द्योरन्तरम् अक्षांश: भवति। यदि नतांश-क्रान्त्यो: दिशा भिन्ना भवेत्तदा द्वयोर्योग: कृते अक्षांश: भवति। अक्षांशज्ञानार्थमस्य सूत्रस्य उपयोगः यस्मिन् कस्मिन् अपि दिने कर्तव्यः।

**शङ्कुर्नरो ना कथितः स एव खार्धाद्रवेर्या विषुवद्दिनार्धे ।**
**नतिः पलोऽक्षश्च स एव तज्ज्ञैस्तत्रोन्नतिर्यास्य स एव लम्बः ।।**[२]

अर्थात् शङ्कु:, ना, नरो वा सर्वेप्येते एकार्थवाचका: शब्दा: सन्ति। विषुवद्दिनार्धे खमध्यात् रवे: या अवनति: नतांशो वा स: तत् स्थानस्य पलाक्ष: अक्षांशो वा कथ्यते। अस्य सूर्यस्य विषुवद्दिनार्धे अवनति: वा लम्बांश: कथ्यते।

**भमण्डलस्थग्रहगोलदिक्काश्चैवं हि याम्योतरमण्डलेऽपि ।**
**अक्षांशकास्ते तु सदैव याम्याखमध्यदेशाद्विषुवं तु यावत्।।**[३]

---

[१] सू.सि.त्रि.श्लो- 14-15

[२] सि. शि. त्रि.श्लो- 12

[३] . सि. त. वि. त्रि.श्लो- 187

अर्थात् भमण्डलस्थग्रहगोलदिशायां याम्योत्तरवृत्ते अक्षांशाः भवन्ति। एते अक्षांशाः सौम्यगोलस्थितानां जनानां कृते सर्वदा यम्योत्तरवृत्ते खमध्यदेशात् विषुवंवृत्तं यावत् भवन्ति।

**गोलौ स्तः सौम्ययाम्यौ क्रियधटरसभे खेचरेऽथायने ते**
**नक्रात्कीटाच्च षड्भेऽथ चरपलयुतोनास्तु पञ्चेन्दुनाड्यः ।।**
**घस्रार्धं गोलयोः स्यात्तदयुतखगुणाः स्यान्निशार्धं तथाक्ष**
**च्छायेषुघ्न्यक्षभायाः कृतिदशमलवोना पलांशा उदीच्याः।।**[1]

अयमेव श्लोकः ग्रहलाघवग्रन्थेऽपि प्राप्यते। तत्र अन्तिमे **कृतिदशमलवोना पलांशा उदीच्याः** इत्यस्मिन् स्थाने **कृतिदशमलवोना यमाशाः पलांशाः**[2] इति प्राप्यते। उभयत्र अभिप्रायः समान एव विद्यते। अर्थात् अक्षच्छाया (पलभा) पञ्च गुणिता क्रियते, गुणनफले अक्षभावर्गस्य दशमलवः अर्थात् पलभावर्गस्य दशमांशः ऊनीक्रियते तदा पलांशाः अक्षांशाः भवन्ति। **उदाहरणम्- यथा द्वारबङ्गायाः पलभा तः अक्षांशज्ञानम् –**

**द्वारबङ्गायाः पलभा -६/४**

द्वारबङ्गायाः पलभा पञ्चगुणिता ३०/१० जाताः पृथक् स्थापिता ।

पुनः द्वारबङ्गायाः पलभावर्गः ३६/४८ अस्य दशमांश ३/४०/४९

अयं दशमांशः द्वारबङ्गायाः पञ्चगुणितपलभायां ३०/१० विशोध्यते तदा २६/३९ द्वारबङ्गायाः अक्षांशः सिद्ध्यति। इत्थं कस्यापि स्थानस्य पलभाद्वारा अक्षांशज्ञानं सुगमतया कर्तुं शक्यते।

---

१ . केतकीग्रहागणितं स्प. श्लो. 12

२ . ग्रहलाघवकरणम् – त्रिप्रश्नाधिकारे श्लो.सं - ६

# स्वरशास्त्रस्य व्यवहारिकः पक्षः

**डॉ.ज्योतिप्रसाददाशः**
e-Mail:- astrologerjyotiprasad@gmail.com

षडङ्गभूतस्य वेदस्य नेत्रस्थानीय ज्योतिषशास्त्रस्य (१) विविधप्रभागेषु स्वरप्रभागस्य कश्चनमहत्त्वं नितरामस्तीति अस्माभिः स्वीक्रियते। परन्तु व्यवहारदृष्ट्या केवलं जन्मचक्रस्य विश्लेषणं तदनुसारं फलादेशकथनं कुर्वन्ति ज्योतिषशास्त्रविदः। परन्तु इतोऽपि महत्त्वपूर्णं सूक्ष्मतत्त्वसम्वलितं स्वरशास्त्रं राजाश्रयात् राज्ञे स्वमौलिकं वैज्ञानिकरहस्यमविवुधन् सर्वजनादृतः तदानीन्तन-काले। स्वरशास्त्रस्य प्राधान्यत्वं प्रतिपादयन् श्रीमन्नरपतिदैवज्ञः - (२)

**स्वरशास्त्रे सदाभ्यासी सत्यवादी जितेन्द्रियः ।**
**तस्यादेशस्य यः कर्त्ता जयश्रीस्तं नृपं भजेत् ।।**
**पत्यश्वगजभूपालैः सम्पूर्णा यदि वाहिनी ।**
**तथापि भङ्गमायाति नृपो हीनस्वरोदयी ।।**

स्वरशास्त्रस्य विशिष्टता प्रतिपादनस्या।ऽयमभिप्रायः यत् अस्माकं शरीरे अहर्निशं यत्स्वरं प्रचलति तस्य ज्ञानं नूनं भवितव्यमिति कृत्वा विषयेऽस्मिन् चर्चयामः। उक्तञ्च शिवस्वरोदये स्वरमाहात्म्यम् - (३)

**स्वरे वेदाश्च शास्त्राणि स्वरे गान्धर्वमुत्तमम् ।**
**स्वरे च सर्वत्रैलोक्यं स्वरमात्मस्वरूपकम् ।।**

यत् पिण्डे तत् ब्रह्माण्डेति सर्वसामान्यज्ञातनियमानुसारेण यत्किमपि पिण्डे दृश्यते तस्यैव प्रतिफलनं ब्रह्माण्डे दृग्गोचरो भवति। अस्माकं शरीरं ब्रह्माण्डस्य कश्चन अवयवास्तीति कथने न कापि हानिः। इयमेव भावनां स्वीकृत्य शरीरे प्रवाहितस्वरस्य श्वाशोच्छवासस्य कीदृग्गतिः तत्सम्बन्धिनी तत्त्वानि शास्त्रानुसारेण चर्चयामः। स्वरस्य प्रवाहः शरीरे विद्यमाननाडिभिः भवति। मनुष्यस्यशरीरे रक्तवाहिनी तथा वातवाहिनी नाडिकाद्वयं प्रमुखनाडीत्वेनगण्यते। यस्यां नाडिकायां

रक्तप्रवाहो प्रावल्येन भवति तथा प्राणवायोः प्रवाहः स्वल्पः तादृशी नाडिका रक्तवाहिनी नाडिका। एतद्वैपरीत्येन वातवाहिनी नाडिका। अर्थात् यस्यां प्राणवायुः निरन्तरं गच्छन्नस्ति। एवमपि वक्तुं शक्यते यत्- यस्यां नाडिकायां वायोः प्रवाहाधिकस्तथा रक्तस्य प्रवाहः स्वल्पः सा नाडी वातवाहिनी नाडीत्युच्यते। प्रत्येकस्य शरीरे कण्ठात् नाभिपर्यन्तं द्विसप्ततिसहस्र (७२०००) नाडिकाः भवन्ति। तेषु विंशतिनाडिकाः प्रमुखाः सन्ति। विंशतिनाडिकास्वपि वातवाहिनी, नामान्तरेण प्राणवाहिनी दशसंख्यकनाडिकाः प्रमुखाः भवन्ति। उक्तञ्च योगचूडामणौ उपनिषद् वचनम् (४) -

**तिर्यगुर्ध्वास्तथा नाड्यौ वायुदेहसमन्विताः।**
**चक्रवत्संस्थिता देहे सर्वा प्राणसमाश्रिताः।।**
**तासां मध्ये दश श्रेष्ठा दशानां तिस्र उत्तमः।**
**इडा च पिङ्गला चैव सुषुम्ना च तृतीयका।।**
**गान्धारी हस्तजिह्वा च पूषा चैव यशस्विनी।**
**अलम्बुषा कुहूश्चैव शंखिनी दशमः तथा।।**
**इडा वामे स्थिता भागे पिङ्गला दक्षिणे स्मृता।**
**सुषुम्ना मध्यदेशे तु गान्धारी वामचक्षुषि।।**
**दक्षिणे हस्तजिह्वा च पूषा कर्णे च दक्षिणे।**
**यशस्विनि वामकर्णे आनने चाप्यलम्बुषा।।**
**कुहूश्च लिंगदेशे तु मूलस्थाने च शंखिनी।**
**दशद्वारं समाश्रित्य तिष्ठन्ति दश नाडिकाः।।**
**पिङ्गलेडासुषुम्ना च प्राणमार्गे समाश्रिताः।**
**एताहि दश नाड्यस्तु देहमध्ये व्यवस्थिता।।**

एताहि दशनाड्यः व्यवस्थिताः। परन्तु दशसु नाडिकासु तिस्र प्रधाननाडिकाः भवन्ति। ताः यथा इडा पिङ्गलासुषुम्नादयः। इडा इत्यस्य सम्बन्धः चन्द्रेण साकं स्थितत्वात् सा नाडी चन्द्रनाडी। पिङ्गलानाडी सूर्येण सह सम्बन्धत्वात् सा

सूर्यनाडी। सुषुम्नानाडी उभयोः साकं (सूर्यचन्द्र) सम्बन्धं स्थापयति। अतः सा शिवनाडीत्युच्यते। ब्रह्माण्डे सूर्यचन्द्रयोः प्रभावः सर्वजनविदित एव। द्वयोः प्रभावः प्रत्येकेषु वस्तुषु प्रत्यक्षतो अनुमीयते। अर्थात् पिण्डस्वरूपात्मकेस्मिन् शरीरे सूर्यचन्द्रनाड्यो सानुकुले शरीरे अपरिमितशक्तिसंचयो भवति। सूर्यचन्द्रस्वरयोः नियत्रणमतीवदुष्करम्। तदर्थं योगाभ्यासस्यावश्यकता वर्तते। योगाभ्यासबलेन स्वरज्ञानं तन्नियन्त्रणञ्च सारल्येन भवितुमर्हति। उक्तञ्च शिवस्वरोदये (५)

**इडायां तु स्थितश्चन्द्रः पिङ्गलायां च भास्करः।**
**सुषुम्ना शम्भुरूपेण शम्भुहंसस्वरूपतः।।**

स्वरज्ञानाय योगसाधनायां बहवः प्रकाराः वर्णिताः सन्ति। तेषु विविधप्रकारेषु स्वरज्ञानं स्व हस्ताभ्यां परीक्षेतुं शक्यते। तत्र परीक्षणविधिः यथा -

नासिकाग्रभागे हस्तस्य तर्जन्यङ्गुल्यादयः स्पृशेत्। तदा नासिकायाः कस्मिन् रन्ध्रपुटे श्वासः बहिर्गच्छति (दक्षिणे वामे वा) तदन्वेषणीयः। यदि आवश्यककार्य निमित्तं स्वरपरिवर्तनं कर्तुमावश्यकतानुभूयते चेत् वामस्वरः पूर्वं प्रचलति स्म। तद्दक्षिणस्वरे परिवर्तनं करणीयं चेत् स्वल्पसमयपर्यन्तं वामपार्श्वे शयनीयम्। तेन स्वल्पसमयाभ्यन्तरे तद्दक्षिणनासारन्ध्रेण स्वर: प्रचलिष्यति। सामान्यतया शरीरे प्राणवायोः गमनागमनं एकैव नासारन्ध्रेण भवति। कदाचित् दक्षिणेन कदाचित् वामेन च। यदि शरीरस्य स्थित्यनुरूपं स्वर उभयनासापुटे चलति चेत् तादृशः स्वरः सुषुम्नानाडिकायां संचारः भवति। तदशुभत्वेन गण्यते स्वरशास्त्रविदः। तेन शरीरे विविधाः विकृयतः ज्वरशिरोवेदनाप्रभृतयः संलक्ष्यन्ते।

**स्वरे पञ्चतत्त्वानां प्रभावः-** शिखिभूखतोयमरुद्गणानामधिपाः भवन्ति भौमादयः ताराग्रहाः (६) । तत्र यदि शरीरे अग्नितत्त्वस्य प्राधान्यता दरीदृश्यते चेत् स्वरस्य प्रवाहः नासिकारन्ध्रास्योपरितमे भागे भवति। अस्मिन् स्वरप्रवाहे शरीरः तीक्ष्णपदार्थानां सेवनं कर्तुमभिलषति। पृथ्वीतत्त्वस्य प्रभावः शरीरे अस्ति चेत् स्वरसञ्चालनं नासिकारन्ध्रस्य सम्मुखभागे भवति। अनेन स्वशरीरस्य क्रमिक-भारवृद्धिर्भवति। तद्धारवहने शरीरे पीडा तथा यदा कदा मानसिकशान्तिरपि

अनुभूयते। आकाशतत्त्वप्रधाने स्वरप्रवाहः सुषुम्नामर्गेण भवति। अर्थात् चन्द्रसूर्यस्वरौ सुषुम्नानाडिमाश्रित्य चलतः। अस्मात् मनोद्विग्नता विविधचिन्ताः शारीरिककार्येषु माद्यताः संलक्ष्यन्ते। जलतत्त्वप्रधाने शरीरे स्वरप्रवाहः नासारन्ध्रादधः प्रदेशे भवति। अस्मिन् प्रवाहे मनोव्याकुलं तृष्णाधिक्यता दृश्यते। वायुतत्त्वप्रधाने शरीरे स्वरप्रवाहः नासारन्ध्रस्य सम्मुखे भागे भवति। यः कोऽपि स्वरः एककालावच्छेदेन चलति चेत् तत्र शरीरे आलस्यता संलक्ष्यते।

स्वरज्ञाने पञ्चतत्त्वानां परिशीलने काचित् भिन्नविधिः शास्त्रेषु सम्प्राप्यते। तद्भति किञ्चन दर्पणं स्वीकृत्य तस्योपरि स्वासोच्छवासः प्रक्षिपेत्। तेन दर्पणोदरे श्वासस्य विविधाकृतयः संलक्ष्यन्ते। तत्र यदि श्वासबाष्पस्याकृतिः चतुष्कोणाकारः स्यात्तदा शरीरे पृथ्वीतत्त्वस्य त्रिकोणाकारे अग्नितत्त्वस्य अर्धचन्द्राकारे जलतत्त्वस्य गोलाकारे वायुतत्त्वस्य प्राधान्यता वर्ततेति ज्ञायते। स्वररूपी यः वायुः वर्तते तस्य स्थानानुसारं दशविधत्वं स्वीकुर्वन्ति आचार्याः। तेषु पञ्चवायवः पञ्चोपवायवश्च भवन्ति। तेषा नामानि स्थानानि च योगचूडामण्युपनिषदानुसारं यथा (७)

**प्राणापान समानाख्या व्यानोदानौ च वायवः।**
**नागः कूर्मोऽथ कृकलो देवदत्तो धनञ्जयः।।**
**हृदि प्राणः स्थितो नित्यमपानो गुदमण्डले।**
**समानो नाभिदेशे तु उदानः कण्ठमध्यगः।।**
**व्यानः सर्वशरीरे तु प्रधानाः पञ्चवायवः।**
**उद्गारे नाग आख्यातः कूर्म उन्मीलने तथा।।**
**कृकलः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे।**
**न जहाति मृतं वापि सर्वव्यापि धनञ्जयः।।**

शरीरे विद्यमाननाडिकासु एव सञ्जीवनीशक्त्याः सञ्चारः भवति। दसषु नाडिकासु काचिदेका नाडी यदि स्वकार्यसम्पादयितुमक्षमा भवति चेत् तस्याः प्रभावः अन्येषामुपरि पतति। अतः स्वरज्ञः स्वशरीरस्य ध्यानं यौगिकक्रियया नियन्त्रणे स्थापयति। योगसाधनां कर्त्तुं तत्र योगाभ्यासस्य षडङ्गानि भवन्ति। तान्यथा- १. आसनम्, २. प्राणायामः, ३. प्रत्याहारः, ४. धारणा, ५. ध्यानम्, ६.

समाधिः। उपरि लिखित षट् यौगिकक्रियासु कीदृशं फलं लभ्यते तदिदानीं चर्चयामः (८)।

**आसनेन रूजं हन्ति प्राणायामेन पातकम्।**
**विकारं मानसं योगी प्रत्याहारेण मुञ्चति।।**
**धारणाभिर्मनोधैर्यं याति चैतन्य मद्भुतम्।**
**समाधौ मोक्ष माप्नोति त्यक्त्वा कर्मशुभाशुभम्।।**

शरीरे वायुस्थानानि तद्भेदाश्च**-**

ये प्राणादि पञ्चवायवः शरीरे प्रमुखाः तेषां नामानि भवन्ति प्राणोपानः समानश्च उदानो व्यान एव च परन्तु शरीरस्यान्येषु कार्येषु प्रचाल्यमानवायवोऽपि भवन्ति। तेषामपि शारिरीकक्रियासु सहभगिता नितरामस्तीति स्वरशास्त्रविदः। तेषां नामानि यथा- नागः कूर्मोऽथ कृकलो देवदत्तो धनञ्जयः। (९) प्राणादि वायूनां स्थाननिरूपणं शिवस्वरोदयानुसारं यथा (१०)

हृदि प्राणो वसेन्नित्यमपानो गुदमंडले। समानो नाभिदेशे तु उदानः कण्ठमध्यगः।
व्यानो व्यापि शरीरेषु प्रधाना दशवायवः।।

इदानीं नागादीनां स्थानानि यथा-

उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः। कृकलः क्षुतकृतज्ञेयो देवदत्तोविजृम्भणे।। (११)
न जहाति मृतं वापि सर्वव्यापि धनञ्जयः। एते नाडीषु सर्वासु भ्रमन्ते जीवरूपिणः।। (१२)

स्पष्टावबोधार्थं चक्रम्**-**

| वायवः | प्राणः | अपानः | समानः | उदानः | व्यानः | नागः | कूर्मः | कृकलः | देवदत्तः | धनञ्जयः |
|---|---|---|---|---|---|---|---|---|---|---|
| स्थानानि | हृदि | गुदयाम् | नाभिदेशे | कण्ठे | कर्णे (सर्वाङ्गे) | उद्गारे | उन्मीलने | क्षुतकृते | विजृम्भणे | सर्वव्यापि (मृतशरी |

प्रायः मनुष्यस्य इयं प्रवृत्तिर्भवति यत् एक-कालावच्छेदेन एकाधिक-कार्यसम्पादनम्। परन्तु किं तत् सम्भवम् ? कदाचित् सम्भवः स्यात्। तदा सम्भवः स्यात् यदा समुचितेकाले कार्यसम्पादनाय गृहात् निर्गमनं स्वरस्यानुकूलता च

स्यात्। प्राक्तने काले जनाः गमनागमनेऽपि नाडिशुद्धिं कुर्वन्ति स्म। कथमिति चेत् वारम्बारं गमनागमनजन्यं तादृशं सौविध्यं नासीत्। तदर्थमभीष्टकार्यस्य संसिद्धये सूर्यचन्द्रनाडीं च परीक्ष्य गन्तुकामः निर्गच्छति स्म। तेन कार्यसिद्धिर्भवति स्म। साप्रतिके काले वयं यदि एनां परम्परां स्वीकृत्य स्व दैनन्दिनकार्यं सम्पादयाम-श्चेदस्माकं सन्ममङ्गलाय स्यादिति मे विश्वासः। प्रसङ्गानुसारं शास्त्रवचनम् -

**चन्द्रसूर्यसमभ्यासं ये कुर्वन्ति सदा नरः।**
**अतीतानागतज्ञानं तेषां हस्तगतं भवेत्।। (१३)**

**सन्दर्भग्रन्थसूची-**

१. किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येस्य तेनोच्यते ।
संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाङ्गेन हीनो न किञ्चित्करः।। सि.शि. कालमान., श्लो. सं.-11

2) नरपतिजयचर्यास्वरोदयः, शास्त्रसंग्रहाध्यायः, श्लो.सं.- 12 एवं 9

3) शिवस्वरोदये स्वरमाहात्म्यम्, श्लो. सं.- 16

4) योगचूडामण्युपनिषद्, शलो. सं.- 16-22

5) वेदचक्षुः शिवस्वरोदये श्लो. सं.- 50

6) बृहज्जातकम्, ग्रहयोनिप्रभेदाध्यायः श्लो. सं.-6

7) योगचूडामण्युपनिषद् शलो. सं.-23- 26

8) योगचूडामण्युपनिषद्, श्लोक-109.10

9) शिवस्वरोदये श्लो. सं.- 43

10) शिवस्वरोदये श्लो. सं.- 44

11) शिवस्वरोदये श्लो. सं.- 46

12) शिवस्वरोदये श्लो. सं.- 47

13) शिवस्वरोदये श्लो. सं.- 56

**ज्योतिषविभागे सहायकाचार्यः, राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.) श्रीसदाशिवपरिसरः, पुरी -१**

# भ्रष्टाचारनिवारकं ज्योतिषशास्त्रम्

**डा. दीपकुमारः**
अनुबन्धाध्यापकः (ज्यो.)
रा.सं.सं. एकलव्य परिसरः

**उपोद्घातः-** वेदस्य निर्मलं चक्षुः ज्योतिश्शास्त्रमकल्मषम् सूक्तिरियं ज्योतिषशास्त्रस्य वेदाङ्गत्वं तस्य निर्दिष्टस्वरूपं च परिभाषयति । ज्योतिषं न केवलं सामान्यचक्षुरपितु निर्मलं चक्षुरस्ति । साधारण नेत्रस्य दृष्टरपि सामान्या भवति मलिनचक्षुषो दृष्टिस्तु दोषयुक्ता अस्पष्टा च भवति । यथा निर्मलं चक्षुः किमपि वस्तुज्ञानं स्पष्टं द्रष्टुं तस्य यथार्थं प्रतिपादनं च कर्तुं शक्नोति तथैव वेदोक्तयज्ञादिविषयाणां यथार्थज्ञानं, प्रतिपादनं, सम्पादनञ्च ज्योतिषशास्त्रेण भवतीति हेतो ज्योतिषशास्त्रस्य आकल्मषत्वं निर्मलत्वं वेदाङ्गत्वं च स्वयं सिद्ध्यति । वेदाङ्गज्योतिषे लगधेन एतस्य कालविधानशास्त्रमिति संज्ञा पठिता ।

**वेदास्तावद्यज्ञकर्मप्रवृत्ता यज्ञा प्रोक्तस्ते कालाश्रयेण ।**

**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान् ।। (वे.ज्यो)**

वस्तुतः कालस्यावधारणायाः कालभेदानाञ्च प्रतिपादनं ज्योतिषशास्त्रेणैव कृतमस्ति। ग्रहनक्षत्रादीनां गत्याधारेण कालगणना क्रियते यस्याः परिणाम-स्वरूपोत्पन्न काल एवमस्याभिरुपयुज्यते । अतः कालमानानि यान्यस्माकं दैनिकव्यवहारे सन्ति तेषां प्रतिपादकं ज्योतिषशास्त्रमस्ति । कालस्य प्रमुखौ नियामकौ सूर्यचन्द्रौ वर्तते यौ ज्योतिषशास्त्रस्य साक्षिणौ मन्येते। एतेन शास्त्रस्यास्य प्रत्यक्षमत्वमपि सिद्ध्यति। उक्तञ्च -

**अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम् ।**

**प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्राकौं यत्र साक्षिणौ ।। (वेदाङ्गज्योतिषम्)**

**स्कन्धत्रयम्-** यथा प्रपञ्चेऽस्मिन् सत्वरजस्तमाः त्रयोगुणाः –भूतभविष्य वर्तमानाः त्रयः कालाः। ब्रह्माविष्णुमहेश्वराः त्रयो देवाः पातालभूस्वर्गाः त्रयोलोकाः

कालीलक्ष्मीसरस्वत्यः तिस्रः देव्यः इडापिङ्गलासुषुम्नाः तिस्रः नाड्यश्च प्रामुख्यं भजन्ति तथैव वेदस्य नेत्रस्थानीयस्य ज्योतिषशास्त्रस्य सिद्धान्तसंहिता होरेति त्रयः स्कन्धाः प्रमुखतामावहन्ति ।

त्रुटेरारभ्य प्रलयान्तं कालगणना ग्रहसञ्चारः सौरसावनचान्द्राक्षात्रादि मानभेदप्रतिपादनं ग्रहस्थितिः व्यक्ताव्यक्तगणितविमर्शः सोत्तराः प्रश्नाश्च यत्र भवेयुः सः सिद्धान्त उच्यते। जन्मकालमाश्रित्य कस्यपि जातकस्य जीवनसम्बन्धि-सर्वविधशुभाशुभानि फलानि यत्रोच्यन्ते सः होरा स्कन्धः। एतस्यैव फलितस्कन्धेति नामान्तरं वर्तते।

निरवशेषेण समष्टिगतं फलं यत्र निर्दिश्यते सः संहिता स्कन्धः भवति । वस्तुतः संहिता स्कन्धस्य क्षेत्रं भूगर्भादन्तरिक्षं यावदस्ति । अस्मिन् क्षेत्रे काले काले जायमानानां परिवर्तनानां तेषां प्रभवानां च निरूपणं संहितास्कन्धः करोति ।

**भ्रष्टाचारो महाव्याधिः**- स्वाधीनताप्राप्तये यादृशं राष्ट्रभक्तिमयं, सच्चरित्रमयं, कर्तव्याववोधमयं वातावरणमासीत् तत् स्वातन्त्र्यप्राप्त्यानन्तरमस्माकं देशे राष्ट्रिय-वातावरणं द्रुतगतिना परिवर्तनमानं सन्दृश्यते । विशिष्य १९८० ई.त. अद्यावधि-पर्यन्तं३६वर्षेभ्यः आर्थिकक्षेत्रे, औद्योगिकक्षेत्रे, चिकित्साक्षेत्रे, विज्ञानक्षेत्रे, व्यवसायक्षेत्रे, शिक्षा क्षेत्रे च अभूतपूर्वाणि परिवर्तनानि जातानि। किन्तु सर्वतोऽधिकपरिवर्तनं राजनैतिक क्षेत्रे प्राशासनिकक्षेत्रे च सञ्जातम्। एतेषु क्षेत्रेषु यत्र अन्यकारकाणां विकासोऽभवत् तत्र भ्रष्टचाराख्यः महाव्याधिरपि समुद्भूतः यस्य कलेवरं दिने दिने वृद्धिं गच्छनस्ति । अस्माकं राष्ट्रे किं वा विश्वे इदानीन्तनकाले याः याः प्रमुखाः समस्याः वर्तन्ते ताः भ्रष्टाचारव्याधिना एवोत्पादिताः । विशिष्य सम्प्रदायवादः-आतंकवाद-महर्घता-आशिक्षा-कुप्रशासनादिनां समस्यानां मूलं भ्रष्टाचार एवास्ति। यतः कर्तव्याववोधविस्मरणेन असत्यस्यावलम्बेन धनलोलुपतया च अधिकारिणः नेतारः अन्ये जनाश्च आचारहीनाः भूत्वा स्वार्थपूर्त्यै नियमविरूद्धान् उपायान् आश्रयन्ति स्वेच्छाचरणं चाचरन्ति । उत्कोचं विना कस्मिन्नपि कार्यालये कार्यमसम्भवं भवति । उत्कोचं दातुं धनार्जनाय पुनः जनाः असम्यककार्याणि

कुर्वन्ति । अन्ये च तान् दृष्ट्वा तथा कर्तुं प्रेरिताः भवन्ति। अनेन राष्ट्रियं वातावरणं दूषितं भवति। किमधिकं वक्तुं शक्यते सामान्यकर्मकरादारभ्य उद्योगपतिं यावत्, ग्रामसभासदस्यादारभ्य केन्द्रियमन्त्रिणं यावच्च देश अनेन भ्रष्टाचारमहाव्याधिना ग्रस्तोऽस्ति। यद्यपि सर्वकारेण सुनेतृभिः सुसामाजिकैश्च काले काले एतस्य महाव्याधेः निदानाय उपायाः क्रियन्ते। जनलोकपाल नियमः जी.एस.टी करनियमः नवम्बर मासस्य अष्टमे दिवसाङ्के भारतराष्ट्रस्य प्रधानमन्त्रिभिः उदघोषितः ५०० तथा १००० धनपत्रकानाम् अमान्यता नियमादय एतस्य उदाहरणानि सन्ति । तथापि स्वकर्तव्यपरायणतावबोधाभावे भ्रष्टाचारः व्यापृतः वर्तते ।

**भ्रष्टाचारनिराकरणाय ज्योतिषीयसिद्धान्ताः-** सर्वाण्यपि संस्कृतशास्त्राणि लोकोपकाराय प्रवर्तन्ते । अपि चैतेषां शास्त्राणां परस्परमन्तसम्बन्धः भवति येन एकस्मिन्शास्त्रे प्रोक्तसिद्धान्तः अपरस्मिनपि शास्त्रे घटति ।

अतः शास्त्राणि परस्परमन्योन्याश्रयसम्बन्धीनि तिष्ठन्ति। तत्रापि ज्योतिषशास्त्रस्य साक्षात्सम्बन्धः लोकेन सामाजिककैश्च वर्तते । यतोऽत्रोक्त-विषयाः प्रत्यक्षं समाजे दृश्यन्ते। लोकं विहाय एकोऽपि विषयः ज्योतिषशास्त्रे नास्ति। लोकानां सुशासनं शास्त्रं करोति। एतच्छास्त्रं यत्र लोकहितं प्रतिपादयति तत्र समाजे व्यापृतान् दोषानपि परिमार्जयति । अतः भ्रष्टाचारोन्मूलनाय ये सिद्धान्ताः अत्र निर्दिष्टाः तेऽत्र संक्षेपेणोच्यन्ते ।

**कर्मविपाकसिद्धान्तः-** इह खलु मानवशरीरं नैकपूर्वभवसमर्जित-पुण्यपुञ्जपरिपाकवशात् प्राप्यते इति तु प्रायः सर्वैरङ्गीक्रियते । अथ च मानवशरीरेणैव मुक्तिपदं प्राप्तुं शक्यते इत्यपि मनुष्ययोनिरेवयमेको भवसागरं तर्तुकामनां मूर्तिमतिलोकेति जानन्ति सर्वे। वस्तुतः प्रपञ्चे सर्वमप्यनुष्ठानं ज्ञानकर्माभ्यां सम्भवति। उक्तं यथा पण्डित प्रवरेण कुमारिलभट्टेन -

**उभाभ्यां पक्षाभ्यां खे यथा पक्षिणां गतिः । तथैव ज्ञानकर्माभ्यां प्राप्यते शाश्वती गतिः ।।**

अमुमेव सिद्धान्तं व्याख्ययति ज्योतिषशास्त्रम् । ज्योतिषशास्त्रं भाग्योत्पादकं शास्त्रं नास्ति। ज्योतिषशास्त्रन्तु भाग्यव्यञ्जकं वर्तते । अत्रे दवधेयं भवति यत्

कर्मविपाकस्य एव भाग्यमिति नामान्तरं वर्तते। अद्यतनीयं शुभमशुभं च कर्म अनन्तरवर्तिनीकाले भाग्यरूपेण परिणमति। तेषामेव शुभाशुभकर्मणां सत्यरूपेण व्यख्यां करोति ज्योतिषशास्त्रम् । उक्तं यथा आचार्य वराहेण -

**यदुपचितमन्यजन्मनि शुभाऽशुभं तस्य कर्मणः पक्तिम् ।**

**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ।। (ल.जा.१/३ )**

यथा अन्धकारयुक्तप्रकोष्ठे विद्युद्दीपं प्रज्वाल्यते चेत्तत्र स्थित वस्तूनि स्पष्टतया दृष्टिपथमायान्ति । तथैव अनेन शास्त्रेण पूर्वकृतानि सदसत्कर्माणि ज्ञायन्ते। विद्युद्दीपः प्रकोष्ठे वस्तूनि नानयति अपितु स्वप्रकाशबलेन तानि सम्यक् प्रदर्शयति । अतः ये जनाः दुःखिता सन्ति तैः पूर्वमशुभानि तथा च ये सुखिनः सन्ति तैः शुभानि कर्माणि आचरितानि इति निश्चीयते । किन्त्वत्र जनाः शङ्कां कुर्युः यत् ये जनाः अतिभ्रष्टाः ते तु सुखेन जीवनयापनकुर्वन्तः दृश्यन्ते अपि च तादृशानि उदाहरणानि अपि बहुधा प्रत्यक्षाणि भवन्ति यत्र अतिपरिश्रमशीलाः कर्तव्यपरायणाः राष्ट्रभक्ताश्चाति दुःखिताः सन्दृश्यन्ते। एतस्या एव शङ्कायाः समाधानं करोति यदुपचितमन्यजन्मनि इति पदम्। अर्थात् इदानीं यत्शुभं फलमनुभूयते तस्य कारणं पूर्वसुकृतमस्ति। इदानीं यद्यभुभमाचर्यते तस्य कुफलमनन्तरं प्राप्यते। तथैव पूर्वार्जि-दशुभकर्मवशादिदानीमशुभफलमस्ति । किन्त्विदानीं शुभं कर्म क्रियते चेदनन्तरं निश्चयेन सुखं प्राप्स्यते । अतः एतस्य सिद्धान्तस्य प्रचारस्यावश्यकता- धुनिके महती वर्तते । अध्यात्मरामायणे निषादं प्रति लक्ष्मणोऽपि कथयति -

**सुखस्य दुःखस्य न कोऽपि दाता परो ददातीति कुबुद्धिरेषा ।**

**अहं करोमीति वृथाभिमानः स्वकर्मसूत्रे ग्रथितो हि लोकः ।।** (अध्यात्मरामायणम्)

एतस्य सिद्धान्तस्य प्रचारपुरस्परं शुभानि कर्माणि कर्तुं शास्त्रमेतत् प्रेरयति । जनानां मनसि यदा एषा भावना दृढतरा भविष्यति यद्यदि वयं भ्रष्टाचारमाचरामः तर्हि निश्चयेननन्तरं दुःखिताः भविष्यामः तदा तेऽत्र सावधानाः भविष्यन्ति । यतः समस्तं भाविफलमत्र प्रकाश्यते । उक्तञ्च -

**श्री जन्मपत्रीशुभदीपकेन व्यक्तं भवेद्भाविफलं समग्रम् ।**

**क्षपा प्रदीपेन यथा ग्रहस्थं घटादिजातं प्रकटत्वमेति ।।** (मानसागरी १-२१ )
सुप्रसिद्धभक्तिकविना श्री तुलसीदासेनाप्योक्तं -
**कर्मप्रधान विश्व करि राखा । जो जस करहिं सो तस फलचाखा ।। - रा. च. मानस**

अतः भ्रष्टाचारनिवारणाय ज्योतिषस्य अयं सिद्धान्तः अति महत्वपूर्णः वर्तते। यतः अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् इति सूक्त्यनुगुणं कृषकः भूमौ यथा बीजं निक्षपति तथा सस्यमपि प्रापणीयं भवति । यवबीजं निक्षिप्य तण्डुलसस्यं न प्राप्यते अथवा कण्टकमारोप्य पुष्पपादपः न समुदेति । अत एव उक्तं श्रीकृष्णेन -
कर्मण्येवाधिकारस्ते मा फलेषु कदाचन। मा कर्मफलहेतुर्भूर्माते सङ्गोऽस्त्व कर्मणि।।(गीता २/४७)
तथैव श्री गोवर्धनपूजाप्रसङ्गेऽपि भगवता कथितम् -
**कर्मणा जायते जन्तुः कर्मणैव विलीयते ।**

**सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते ।। (श्री भा.म.1॰-24-13)**

अत्र द्रष्टव्यं भवति यत् कृषकः यदा बीजवपनं करोति तत्क्षणमेव सस्यं न प्राप्नोति तथैव यदा जनैः भ्रष्टाचारः क्रियते तदा एव ते दण्डभाक् न भवन्ति अनन्तरवर्तिनी काले ते स्वकर्मणः फलं प्राप्नुवन्ति । शुभाशुभाकर्मणः फलमस्मिन् जन्मनि अन्यजन्मनि वा भोक्तव्यं भवति । अतः ज्योतिषशास्त्रस्य कर्मविपाक सिद्धान्तस्याचरणेन जनाः भ्रष्टाचारं निवारयितुं प्रयत्मानाः भविष्यन्ति। अत एव आचार्यवराहेणाऽत्र पूर्व शब्दः उपयुक्तः -
**होरेत्यहोरात्र विकल्पमेके वाञ्छन्ति पूर्वापर वर्णलोपात् ।**
**कर्मार्जितं पूर्वभवे सदादि यत् तस्यपक्तिं समभिव्यनक्ति ।।** बृहज्जातकं-१/३

**आयुसिद्धान्तः-** सर्वेऽपि प्राणिनः दीर्घायुष्यमिच्छन्ति । जगत्यस्मिन् कोऽपि जनः अकालमृत्युमल्पायुं च नेच्छति। तत्र फलितज्ज्योतिषे बहुषु ग्रन्थेषु आयुर्दायाध्यायेति नाम्ना विस्तरेण आयुविषयिणी चर्चा कृता वर्तते। तत्र विविधायुसाधनपुरस्सरजातिभेदेन प्रणिनामायुष्यपरिमाणमपि प्रदर्शितमस्ति आचार्यैः। किन्तु आयुष्यमपि कर्मार्जितमेव भवति । वस्तुतः गर्भस्थजीवस्य स्व स्व कर्मणानुगुणं पञ्चविषयाः विधिना निश्चीयन्ते । तद्यथा -

**आयुः कर्म च वित्तं च विद्या निधनमेव च ।**

**पञ्चैतानि हि सृज्यन्ते गर्भस्थस्यैव देहिनः ।।** (पञ्चतन्त्रम् २/८४ )

मनुष्याणां वर्षभेदेन अल्पायुः मध्यमायुः दीर्घायुश्च आचार्यैः वर्णितः किन्तु अन्तिमे पर्याये तैः स्पष्टं भणितं यत् ये जनाः स्वधर्मपालने रताः, द्विजदेवादीनामभिवादनकर्तारः, कर्तव्यपरायणाः, सात्विकाहाररताः च सन्ति ते एव दीर्घायुष्यं प्राप्नुवन्ति । कथितञ्च -

**ये धर्ममार्ग निरता द्विजदेवभक्ता ये पभ्यभोजनरता विजितेन्द्रियाश्च ।**

**ये मानवा दधति सत्कुलशीलसीमास्तेषामिदं कथितमायुरूदारधीभिः ।।** (जा.पा. ५/३५)

विपरीतस्थितौ विपरीतं फलमश्नन्ति मानवाः। अर्थात् ये चौर्यादि पापकर्मणि रताः, सर्वभक्षकाः, लोभपूर्णाः, परद्रव्यलुण्ठकाः, स्वधर्महीनाः, हिंसायुक्ताः, उग्रकर्मकर्तारः, द्विजदेवनिन्दकाः, (द्विजशब्देनाऽत्र विद्वान् इत्यर्थो ग्राह्यः) आचारहीनाश्च स्युः तेषामल्पायुष्यं भवति । तथाह-

**ये पापलुब्धाश्चौरा ये देवब्राह्मणनिन्दकाः । सर्वाशिनश्च ये तेषामकालमरणं नृणाम् ।।**
**धर्मे विकल्पबुद्धीनां मूर्खाणां पिशुनस्य च । स्वधर्माचारहीनानां परकर्मोपजीविनाम् ।।**
**शास्त्रेष्वनियतानां च मूढानामपमृत्यवः । अन्येषामुत्तमायुः स्यादिति शास्त्रविदो विदुः।।**

(जा.पा. 5-36-39)

अतः ज्योतिषशास्त्रस्यानेन सिद्धान्तेनापि जनाः जागरूकाः भूत्वा दीर्घाष्युं प्राप्तुं भ्रष्ट्रचारात् च्युताः भविष्यन्ति ।

**सत्य तथा सदाचार-सिद्धान्तः–** सत्यसदाचारौ वस्तुतः एकस्य नाणकस्य द्वौ पक्षौ स्तः । अन्योन्याश्रयसम्बन्धेन एतौ परस्परं पूरकौ स्तः । संहितास्कन्धस्य सर्वप्रसिद्धग्रन्थे बृहत्संहितायामाचार्यवराहमिहिरेण दैवज्ञलक्षणसन्दर्भे सत्यसदाचारयोः पालनार्थमुपदिष्टाः वयम्। तत्रोक्तमस्ति यत्दैवज्ञः अवितथभाषी अनुसूयकः अनिन्दकः समोऽर्थात् रागद्वेषरहितः । शत्रौ मित्रे च तुल्यस्नेहः मेघमृदङ्गासमध्वनियुक्तः च स्यात् । यः सत्यवाक् भवति स एव रागद्वेषरहितो भूत्वा सदाचरणं कर्तुं प्रभवति । शास्त्रान्तरेष्वपि सत्याचरणाय बहुधा निर्देशो कृतो वर्तते ।

**सत्येनैव विशुध्यन्ति शुद्धकामश्च मानवाः ।**

**तस्मात्प्रब्रूहि यत्सत्यमादिमध्यावसानकम्।।** (अंगिरा स्मृ.३/४)

शास्त्रेषु **सत्यं परं धीमहि** इत्युक्त्वा ईश्वरस्य स्वरूपं सत्यात्मकं भणितमस्ति। श्रीमद्भागवतपुराणे भगवतः स्तुतिः देवैरित्थ्यं कृताऽस्ति-

**सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये ।**

**सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः ।।** श्री.भा.महा.१/२/६

अतः सर्वदा सत्याश्रितो मानवः भ्रष्टाचारहीनो भूत्वा सदाचारयुक्तो भवेदित्याशयो वर्तते। मनुनाऽपि निर्दिष्टमस्ति यदस्मिन्प्रपञ्चे सत्यादधिकः धर्मः असत्यादधिकश्च पापः न विद्यते । अतः सर्वैः सर्वदा सत्ययुतैर्भाव्यम् । तथाह -

**नास्ति सत्यात्परो धर्मो नानृतात्पातकं परम् ।**

**साक्षिधर्मे विशेषेण तस्मात्सत्यं विशिष्यते ।।** मनु.स्मृ.७/८

आधुनिके लोभक्रोधमोहादिभिः ग्रस्तो भूत्वा मानवः धनलोलुपतापूर्त्यर्थं नियमविरुद्धरुपायानवलम्ब्य अहर्निशं प्रयतते, येन भ्रष्टाचाराः दिनं दिनमेधते । अतः सदाचारोषधिना भ्रष्टाचाररोगः निरकरणीयः यतः आचारहीनः इहलोके निन्दितः परलोके च दुखी भवति ।

**आचारहीनः पुरुषो लोके भवति निन्दितः ।**

**परत्र च सुखी न स्यात्तस्मादाचारवान् भवेत् ।।** शिवपुराणम् १४/५६

वसिष्ठेनापि उक्तं यत् दुराचारयुक्तः जनः सततं व्याधियुक्तः अल्पायुश्च भवति ।

**दुराचारो हि पुरुषो लोके भवति निन्दितः ।**

**दुःखभागी च सततं व्याधितोल्पायुरेव च ।।** वसिष्ठस्मृ.६/६

अयमेव सिद्धान्तः त्रिस्कन्धज्ञेन आचार्यवराहेणापि प्रतिपादितः। तद्यथा दैवज्ञः शास्त्रोक्तशौचानुष्ठाता परस्वदेवधनाद्यलुब्धश्च भवेत्। तस्य वाणी शास्त्रार्थानुसारिणी स्यात् । सर्वदेशेषु व्यवहारज्ञः, निर्मलचित्तः, भयहर्षशोकादिभि

रनभिभवनीयः, अव्यसनी, सात्विकः च भवेत् । तद्यथा- **शुचिर्दक्षः प्रगल्भो वाग्मी प्रतिभानवान् देशकालवित् सात्विको न पर्षद्भीरुः कुशलोऽव्यसनी -** (बृ.सं २/३)

वस्तुतः दैवज्ञोऽत्र उपलक्षणमात्रमस्ति । दैवज्ञव्याजेन अयं सिद्धान्तः सर्वेभ्यः वर्तते यतः संहितायान्तु समष्टिगतं फलं भवति । एतस्य सिद्धान्तस्य परपालनेन भ्रष्टाचारदोषः निराकृतो भविता ।

**उपसंहारः–** यो ज्योतिषं वेत्ति नरः स सम्यग्धमर्थिकामाँल्लभते यशश्चेति वचनमिदमत्यन्तं विश्रुतं साक्षाद् भास्करवतारस्य ज्योतिर्विद्भास्कराचार्यस्यैव। आचार्योऽयं मुक्तकण्ठेन कथयति यच्छास्त्रमिदं न केवलमर्थप्रदमेव किन्तु धर्मार्थिकामयशः प्रदम् । शास्त्रेऽस्मिन् यत्र मानवस्य जन्मतः मृत्युपर्यन्तं सर्वेऽपि विषयाः व्याञ्जिताः तत्रैव पदे पदे परोपकारदानादि कर्तुमपि प्रेरणा प्रदत्तास्ति। जन्मकालवशादशुभग्रहकृत्क्रूरफलोपशमनाय निर्धनेभ्यः अन्नवस्त्रादिदानानि निर्दिष्टानि सन्ति आचार्यैः । अनेन जनाः परस्परं सहकर्तुं परोपकारकर्तुं च उद्यताः भवन्ति अपि च सामाजिकेषु अन्योन्यं स्नेहभावनायाः शिवभावनायाश्च प्रसारो जायते। ज्योतिषशास्त्रे न केवलं मानवानां कृते दानादिकं कथितमपितु वृक्षादि-रोपणेन कूपादिनिर्माणेन च प्राप्तपुण्येन स्वर्गप्राप्तिर्जायते। तथाह वास्तुशास्त्रे -

**अश्वत्थमेकं पिचुमन्दमेकं(निमवृक्षः) न्यग्रोधमेकं दशाचिञ्चिणीकम् ।**
**कपित्थ विल्वालमकत्रयञ्च पञ्चाम्रवापी नरकं न पश्येत् ।।** (बृ.वा.वाटिकारोपणमा.२३)

**अपि च - यो वाटिकां राजपथः समीपे स्विष्टां तथा कूपसमान्विताञ्च ।**
**स्वर्गे च वासं लभते मनुष्यश्चतुर्युगं सर्वसुखैरुपेतः ।।** बृ.वा.वाटिकारोपणमा-३३

इत्थं ज्योतिषशास्त्रे विविध समस्यानां निवारणाय लोकोपकाराय भ्रष्टाचारोन्मूलनाय च अनेके सिद्धान्ताः प्रतिपादिताः यान् आश्रित्य व्यवहृत्य च जनाः भ्रष्टाचारमुत्पाटयितुं सदाचारमुत्पादयितुं च स्वेच्छयानुशासिताः भूत्वा मनसा वाचा कर्मणा च प्रयत्नशीलाः भविष्यन्तीति मे मतिः ।

# अधिशेषविमर्शः

**डॉ. वरुणकुमारझाः**
सहायकप्राचार्यः, ज्योतिषविभागः
कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयः, बिहार

**दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा।**
**पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम्॥**

ग्रह-नक्षत्र-प्रकाशप्रभृतिपदार्थावबोधो ज्योतिःपदेन भवति। तान् ग्रह-नक्षत्रादि पदार्थानधिकृत्य कृतं शास्त्रं ज्योतिषं ज्यौतिषं वा इत्युच्यते।

ग्रहर्क्षादीनां शुभाशुभप्रभावो ब्रह्माण्डान्तर्वर्तिसमस्तचराचरप्राणिनामुपरि पतति। तदनुसारं कार्यविशेषस्य कृते कालस्यानुकूल्यं प्रातिकूल्यञ्च ज्यौतिष-शास्त्ररीत्या सम्यग्विज्ञाय प्रतिकूलसमयं विहाय शुभसमये सरलतया कार्यसिद्धये षोडशसंस्कारवास्तुयात्रोत्सवविपणिप्रभृतिविविधकृत्यानामनुष्ठानं क्रियते। यतो हि शुभसमये समारब्धं कर्म स्वल्पायासेन सम्यक्तया निर्विघ्नं सम्पद्यते। अपि च एतच्छास्त्रनिर्मितपञ्चाङ्गसाहाय्येन महापुरुषजयन्त्यादीनाम् ऐतिहासिकतथ्याना व्रतपर्वसङ्क्रान्तिहरिवासरवारुणी महावारुणी महामहा वारुणी गजच्छायां गोविन्द द्वादशीहोलीरामनवमीजानकीनवमीगङ्गादशहरारथयात्राकृष्णाष्टमीराधाष्टमीदीपावलीप्रतिहारषष्ठीमहोदयअर्द्धोदयद्वादशकुम्भयोगादीनाञ्च समयज्ञानं समीचीनतया सम्पद्यते। तस्मादेतच्छास्त्रस्य कालव्यवस्था मुहूर्तव्यवस्था च विज्ञानसम्मतेति। ज्यौतिषं कालविधानशास्त्रमुक्तं मनीषिभिः। यथोक्तं लगधाचार्येण-

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः।**
**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्॥1**

श्रीपतिना- **क्रतुक्रियार्थं श्रुतयः प्रवृत्ताः कालाश्रयास्ते क्रतवो निरुक्ताः।**
**शास्त्रादमुष्मात् किल कालबोधो वेदाङ्गताऽमुष्य ततः प्रसिद्धा॥2**

भास्कराचार्येण- **वेदास्तावद्यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण।**

**शास्त्रादस्मात्कालबोधो यतः स्याद्वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात्॥3**

मुरलीधरठक्कुरेणापि - **लौकिकवैदिककार्यव्यापारमात्रस्य समयाधीनत्वात्तज्ज्ञानं येन शास्त्रेण भवति तज्ज्यौतिषम्।4**

कालस्तावन्नवविध उक्तः- सौर-चान्द्र-सावन-नाक्षत्र-बार्हस्पत्य-पितृ-देवासुर-मनु-ब्राह्मभेदात्। यथा सूर्यसिद्धान्ते-

**ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं च गौरवम्।**

**सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नव॥5**

सिद्धान्तशिरोमणावपि - **एवं पृथग् मानवदैवजैवपैत्रार्क्षसौरेन्दवसावनानि।**

**ब्राह्मं च काले नवमं प्रमाणं ग्रहास्तु साध्या मनुजैः स्वमानात्॥6**

सिद्धान्तशेखरे - **पैतामहं दिव्यमथासुरं च पित्र्यं तथा मानुषमानमन्यत्।**

**सौरार्क्षहैमांशवसावनानि जैवं तथैवं नव कीर्त्तितानि॥7**

अत्र दिव्यासुरयोरैक्येन नवविधत्वं कालस्य। कमलाकरेणापि-

**ब्राह्मं दिव्यं तथा पैत्रं प्राजापत्यं गुरोस्तथा।**

**सौरं च सावनं चान्द्रमार्क्षं मानानि वै नव॥8**

उपर्युक्तेषु नवविधकालमानेषु अधिशेषस्य सम्बन्धः सौरचान्द्रमानाभ्यां सह विद्यते। सौरमानन्तु सूर्यगतिसम्बद्धं भवति। तत्र सूर्यस्य त्रिंशदंशात्मकराशेरेकांश भोगकालः सौरदिनम् राशिभोगकालः सौरमासः भगणभोगकालश्च सौरवर्षमुच्यते। यथोक्तं सूर्यसिद्धान्ते ***सङ्क्रान्त्या सौर उच्यते।*** 9

चान्द्रमानन्तु सूर्य-चन्द्रगतिसम्बद्धं भवति। तच्च द्वादशभक्तं सूर्य-चन्द्रगत्यन्तरसमं तिथिभोगरूपं चान्द्रदिनं भवति। तेनैकतिथिभोगकालश्चान्द्रदिनं त्रिंशत्तिथिभोगकालश्च चान्द्रमासः कथ्यते। यथोक्तं सूर्यसिद्धान्ते ***ऐन्दव-***

*स्तिथिभिस्तद्वत्।* [10] सामान्यतया एकस्मिन् सौरवर्षे द्वादशचान्द्रमासा परमधिमासवतिवर्षे तु त्रयोदशचान्द्रमासा भवन्ति ।

चान्द्रमासो द्विविधो भवति कृष्णप्रतिपदादिपूर्णिमान्तः शुक्लप्रतिपदाद्यमावास्यान्तश्च। तत्र मलमासादयः शुक्लाद्यनुरोधेन व्रतसङ्कल्पक्षयाहादयस्तु कृष्णाद्यनुरोधेन सम्पद्यन्ते।

अधुना अधिशेषविचारः प्रस्तूयते। तत्र सौरचान्द्रयोरन्तरमधिशेषं भवति। यथोक्तं भास्कराचार्येण-

**दर्शावधिश्चान्द्रसमो हि मासः सौरस्तु सङ्क्रान्त्यवधिर्यतोऽतः।**

**दर्शाग्रतः सङ्क्रमकालतः प्राक् सदैव तिष्ठत्यधिमासशेषम्॥11**

इत्यनेन प्रमाणेन अमान्त-सङ्क्रान्तिमध्यवर्तिकालः अधिशेषपदेनोच्यते। तत्रैकस्मिन् सौरवर्षे सावनदिनादिमानम् 365-15-30-22-30 भवति। एतन्माने द्वादशभक्ते एकस्मिन् सौरमासे 30-26-17-31-52-30 सावनदिनादिमानं भवति। यथोक्तं भास्कराचार्येण-

**पञ्चाङ्गरामास्तिथयः खरामाः सार्धद्विदस्राः कुदिनाद्यमब्दे।**

**अस्यार्कमासोऽर्कलवः प्रदिष्टस्त्रिंशद्दिनः सावनमास एव॥12**

एवमेकस्मिन् चान्द्रमासे 29-31-50 सावनदिनादिमानं भवति। यथोक्तं भास्कराचार्येण-

**कालेन येनैति पुनः शशीनं क्रामन् भचक्रं विवरेण गत्योः।**

**मासः स चान्द्रोऽङ्कयमाः कुरामाः पूर्णेषव 29-31-50 स्तत्कुदिनप्रमाणम्॥13**

अनयोः सौरचान्द्रमासगतकुदिनयोरन्तरम् 00-54-27-31-52-30 दिनादिकमधिशेषं प्रतिमासं भवति। इदमेवाधिशेषं वर्द्धितं सत् सार्द्धद्वात्रिंशन्मासासन्नकाले मासतुल्यं भवति। तेन तदानीमधिमासः पतति। यथोक्तं वशिष्ठेन-

**द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा।**
**घटिकानां चतुष्केण पतत्यधिकमासकः॥**14
तत्र युगाधिमासैः युगसौरमासास्तदा एकेनाधिमासेन किमित्यनुपातेन यथोक्तमान-मायाति। यथोक्तं सूर्यसिद्धान्ते-

**षड्वह्निनत्रिहुताशाङ्कतिथयश्चाधिमासकाः।15**
**खचतुष्कसमुद्राष्टकुपञ्चरविमासकाः।16**

इत्यनेन सूर्यसिद्धान्ते युगसौरमासाः 51840000, युगाधिमासाश्च 1593336 निरूपिताः। तेन युगसौरमासाः युगाधिमासैः भाजितास्तदा लब्धिः 32-16-03-55 सौरमासाद्या = 32-16-04 (स्वल्पान्तरात्)। अतोऽत्र वशिष्ठोक्तं मानं युक्तियुक्तं प्रतिभाति, सूर्यसिद्धान्तोक्तमानस्य सन्निकटत्वात्।

ज्यौतिषे मध्यममानेन अधिमासज्ञानप्रकारोऽपि प्रदर्शितः। यद्यप्यत्र यदा-कदा स्पष्टमानप्राप्ताधिमासेन सहान्तरमपि पतति। तत्र मध्यममानेन कस्मादधिमासात् कोऽधिमासः आपततीत्यस्य साधनविधिः प्रदर्शितः करणग्रन्थेषु। तद्यथा मकरन्दप्रकाशे-

**हीनः शकाब्दो गगनाग्निनागैर्नवेन्दुभक्तो यदि शेषकं स्यात्।**
**गुणेश शून्याष्टनृपेषु विश्वे चैत्रादयः सप्त सदाधिमासाः॥17**

अनेन प्रकारेण 1940 शकाब्दे मध्यममानेन आषाढेऽधिमासः सिद्ध्यति किन्तु स्पष्टमानेन ज्येष्ठोऽधिमासः सञ्जातः। इदमन्तरं मध्यम-स्पष्टजन्यमिति।

यथोक्तविषयावगाहनेन प्रतिभाति यदधिमासो द्विविधो भवति - मध्यमाधिमासः स्पष्टाधिमासश्च। यथोक्तं गोकुलनाथेन– ***अधिमासो द्विविधः-चन्द्रार्कयोर्मध्यमगतिमानसिद्धः, स्फुटगतिमानसिद्धश्च। तत्राद्यो ज्यौतिषप्रसिद्धो***

*व्यवहारबहिर्भूतः। द्वितीयस्तु चन्द्रार्काभ्यां प्रत्येकघटिकाकर्षणेन स्फुटं गच्छद्भ्यां निवर्त्तितः।* [18]

अर्थात् अधिमासो द्विविधो भवति – मध्यममानसिद्धो व्यवहारबहिर्भूतः प्रथमः। अस्य मध्यममानसिद्धस्य अधिमासस्य अनुपातादौ प्रयोजनं भवति। लोकव्यवहारे अस्योपयोगो न भवति। द्वितीयस्तु स्पष्टमानसिद्धोऽधिमासः। एतस्योपयोगः ज्यौतिषशास्त्रेऽपि भवति लोकव्यवहारे चापि भवति। स्मृतिग्रन्थेषु कृत्यसार-कृत्यशिरोमणि-द्वैतनिर्णय-सुश्लिष्टपरिशिष्ट-शुभकर्मनिर्णय-निर्णयसिन्धु-धर्मसिन्धु-कालमाधवादिग्रन्थेषु अधिमासप्रकरणे मलमासप्रकरणे वा विहितनिषिद्ध कर्माणि विस्तरेण प्रतिपादितानि सन्ति।

साम्प्रतं रव्युच्चं मिथुनाष्टादशांशे तन्नीचञ्च धनुरष्टादशांशे वर्तते। उच्चासन्ने ग्रहगतिरल्पा नीचासन्ने च तद्गतिरधिका भवति। तस्मात् कारणात् रव्युच्चोभयदिशि भगणार्द्धासिन्नसमये स्पष्टमानेन चान्द्रमासान्तःपातिसावनदिनानि सौरमासान्तः पातिसावनदिनेभ्यो न्यूनानि भवन्ति। अतएव तदानीमधिमासपातः सम्भवति। अतएव वर्त्तमानसमये रव्युच्चानुरोधेन सामान्यतया चैत्रादिसप्तमासेषु अधिमास-पातकथनं युक्तियुक्तमेव। परञ्च रव्युच्चस्य चलत्वात् कालान्तरे सर्वेषु मासेषु क्रमेणाधिमाससम्भव इति ज्यौतिषशास्त्रसिद्धान्तः।

पूर्वोक्ताधिशेषोत्पत्तिविवेचनया स्पष्टं भवति यन्मध्यममानेन सौरचान्द्रान्तर रूप-अधिशेषोद्भवकालाधिक्यवशात् पूर्वाधिमासादग्रिमाधिमासः सार्द्धद्वात्रिंश न्मासान्तरितस्तिष्ठति। स्पष्टमानेन तु गणितबलेन एकस्मादधिमासात् अपरोऽधि-मासः 27 तः 36 मासमध्ये पतति। इतो न्यूनकाले नास्य पातः सम्भवति। अतएव क्षयमासवतिवर्षे पूर्वापरयो रधिमासयोर्मध्ये अग्रिमाधिमासे एव अधिशेषोद्भव कालाधिक्यवशात् मासवृद्धिः अर्थात् मलमासपातः समुचितः। पूर्वोक्तलक्षणेन तस्य सन्निकटत्वात्। पूर्वाधिमासे तु न मासवृद्धिः तत्र अधिशेषोद्भवमासासन्न-कालालाभात्। एतेन ***असङ्क्रान्तिमासोऽधिमासः स्फुटं स्याद्*** [19] इति भास्करोक्तलक्षणेन उभयत्र असङ्क्रान्तमासत्वेन अधिमासत्वमिति सम्यगुपपद्यते।

किन्तु तत्रोभयत्र न मासवृद्धिः अर्थादधिमासत्वेनैव न मासवृद्धिः सूच्यत इति भावः, मासवृद्धेः अधिशेषोद्भवमासासन्नकालसापेक्षत्वात्। तेन कालाधिक्ये सति असङ्क्रान्तित्वमधिमासत्वम्, तत्रैव च मासवृद्धिः, कालाधिक्याभावे असङ्क्रान्ति, त्व मधिमासत्वं यत्तत्र न मासवृद्धिरिति फलितार्थः। यथोक्तं म॰म॰ बापूदेवशास्त्रिणा-

**एकस्मिन्नपि वर्षे चेद्द्वौ मासावधिमासकौ।**
**पूर्वो मासः प्रशस्तः स्यादपरस्त्वधिमासकः॥**
**एकस्मिन्नपि वर्षे यत्रेदं लक्ष्म दृश्यते उभयोः।**
**तत्रोत्तरोऽधिमासः स्फुटगत्या चायमर्केन्द्वोः॥ 20**

म॰म॰अमृतनाथेन -

**मासद्वयस्य मध्ये तु सङ्क्रान्तिर्न यदा भवेत्।**
**प्रकृतस्तत्र पूर्वः स्यादुत्तरस्तु मलिम्लुचः॥21**

जाबालिना -

**मासद्वयेऽब्दमध्ये तु सङ्क्रान्तिर्न यदा भवेत्।**
**प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तरः॥**
**उत्तरे एव कालाधिक्यम्, न पूर्वस्मिन्नित्यर्थः। 22**

अत्रैव कृष्णम्भट्टेन व्याख्यायाम्-*प्राकृत इति। प्रकृतिः स्वभावः त्रिंशद्दिनरूप-स्तद्युक्तः,अनधिकः, शुद्धः, कर्मार्हि इति यावत्।*

म॰म॰मित्रमिश्रेण-

**एकस्मिन्नपि वर्षे चेद्द्वौ मासावधिमासकौ । पूर्वो मासः प्रशस्तः स्यादपरस्तु मलिम्लुचः॥**23

काशीनाथेनापि -

***तत्र क्षयमासात्पूर्वोऽधिमासः संसर्पसंज्ञः सर्वकर्मार्हिः शुभकर्मणि न त्याज्यः॥* 24**

॥शमिति॥

**सन्दर्भाः -**


1. वेदाङ्गज्योतिषे, श्लो. 3.
2. सिद्धान्तशेखरे, साधनाध्याये, श्लो. 4.
3. सिद्धान्तशिरोमणौ, ग्रहगणिते, मध्यमाधिकारे, कालमानाध्याये, श्लो. 9.
4. सि.शि., ग्रहगणिते, मध्यमाधिकारे, कालमानाध्याये, श्लो. 9-12 प्रभाटीकायाम्।
5. मानाध्याये, श्लो. 1.
6. सिद्धान्तशिरोमणौ, ग्रहगणिते, मध्यमाधिकारे, कालमानाध्याये, श्लो. 32.
7. साधनाध्याये, श्लो. 47.
8. सिद्धान्ततत्त्वविवेके, मध्यमाधिकारे, मानाध्याये, श्लो. 13.
9. मध्यमाधिकारे, श्लो. 13, द्वितीयचरणम्।
10. मध्यमाधिकारे, श्लो. 13, प्रथमचरणम्।
11. सिद्धान्तशिरोमणौ, गोलाध्याये, मध्यगतिवासनायाम्, श्लो. 16.
12. सिद्धान्तशिरोमणौ, गोलाध्याये, मध्यगतिवासनायाम्, श्लो. 8.
13. सिद्धान्तशिरोमणौ, गोलाध्याये, मध्यगतिवासनायाम्, श्लो. 9.
14. निर्णयसिन्धौ, प्रथमपरिच्छेदे, मलमासनिरूपणे, पृ. 52.
15. मध्यमाधिकारे, श्लो. 38 पूर्वार्द्धः।
16. मध्यमाधिकारे, श्लो. 39 पूर्वार्द्धः।
17. मिश्रकाधिकारे, श्लो. 4.
18. मासमीमांसायाम्, पृ. 11-12.
19. सि. शि., ग्रहगणिते, मध्यमाधिकारेऽधिमासादिनिर्णये, श्लो. 6 प्रथमचरणम्।
20. सि. शि., ग्रहगणिते, मध्यमाधिकारेऽधिमासादिनिर्णये, श्लो. 6 टिप्पण्याम्।
21. कृत्यसारसमुच्चये, मलमासविचारे, पृ. 63.
22. निर्णयसिन्धौ, प्रथमपरिच्छेदे, मलमासनिरूपणे, पृ. 54.
23. वीरमित्रोदये, समयप्रकाशे, मलमासनिर्णये, पृ. 143.
24. धर्मसिन्धौ, प्रथमपरिच्छेदे, मलमासप्रकरणे, पृ. 4.

# सोदाहरणं दिनगणसाधनम्

**आनन्दप्रकाशपाठकः**
सिद्धान्तज्योतिषाचार्यद्वितीयवर्षः
रा.सं.सं. लखनऊपरिसरः

वेदपुरुषस्य षड्गेषु[१] चक्षुर्भूतस्यास्य ज्योतिषशास्त्रस्य महत्त्वं सर्वविदितमेवास्ति। यथोक्तं स्वीये सिद्धान्तशिरोमणौ भगवता भास्करेण[२]-

**वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येस्य तेनोच्यते।**
**संयुतोपीतरैः कर्णनासादिभिः चक्षुषाऽङ्गेन हीनो न किञ्चित्करः।।**

तथा - **यथा शिखामयूराणां नागाणां मणयो यथा।**
**तद्वद् वेदाङ्गशास्त्राणां ज्यौतिषं मूर्ध्नि संस्थितम्।।**[३]

एवं भूतस्य ज्योतिषशास्त्रस्य सिद्धान्त-संहितां-होराभेदत्रयेषु सर्वेषां मूलभूतत्वात् सिद्धान्तः सर्वथा श्रेयनित्यत आह शिरोमणौ भास्कराचार्येण-

**गर्जत्कुञ्जरवर्जिता नृपचमूरप्यूर्जिताऽश्वादिकै-**
**रुद्यानं च्युतचूतवृक्षमथवा पाथोविहीनं सरः।**

**योषित् प्रोषितनूतनप्रियतमा यद्वन्न भात्युच्चकै-**
**र्ज्योतिःशास्त्रमिदं तथैव विबुधाः सिद्धान्तहीनं जगुः।।** [४]

---

१.शब्दशास्त्रं मुखं ज्योतिष चक्षुषि श्रोतमुक्तं निरुक्तं च कल्पः करौ ।
या तु शिक्षास्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैः बुधैः ।। सिद्धान्तशिरोमणि गणिताध्याय कालमाना. श्लोक संख्या 10

२. सिद्धान्तशिरोमणि गणिताध्याय कालमाना. श्लोक संख्या 11

३ वेदांगज्योतिषे

४ सिद्धान्तशिरोमणि गणिताध्याय कालमाना. श्लोक संख्या 8

सिद्धान्तस्य मुख्यप्रयोजनं वर्तते ग्रहानयनम्। जातकस्य जन्मकुण्डल्यां सर्वाणि शुभाशुभफलानि ग्रहाश्रितानि भवन्ति। तद्यथा सिद्धान्तशिरोमणौ गोलाध्याये-[१]

**ज्योतिःशास्त्रफलं पुराणगणकैरादेश इत्युच्यते**
**नूनं लग्नबलाश्रितं पुनरयं तत् स्पष्टखेटाश्रयम्।**

ते ग्रहाः तु अहर्गणेनैव सिद्धयन्ति। अतः प्रायः समेषु सिद्धान्तग्रन्थेषु करणग्रन्थेषु च अहर्गणानयनस्य विधिः प्राप्यते। तद्यथा सिद्धान्तशिरोमणौ[२]

**कथितकल्पगतोर्कसमागणो रविगुणो गतमाससमन्वितः।**
**खदहनैर्गुणितस्तिथिसंयुतःपृथगतोऽधिकमाससमाहतात् ।।**
**रविदिनाप्तगताधिकमासकैः कृतदिनैः सहितो द्युगणो विधोः।**
**पृथगतः पठितावमसंगुणाद्विधुनाप्तगतावमवर्जितः।।**
**भास्करवासरपूर्वको दिनगणो रविमध्यमसावनः।**
**अधिकमासदिनक्षयशेषतो द्युघटिकादिकमत्र न गृह्यते ।।**

सिद्धान्ततत्त्वविवेके -[३]

**सौराब्दा ये सृष्टिवत्रात् प्रायाता यावत् स्वीयं सौरवर्षस्य वत्रम्।**
**निघ्नाते वै सृष्टिकल्पाधिमासैस्तत्रत्यैस्तैः सौरवर्षैर्विभक्ताः।।**
**लब्धा ये स्युः स्वाधिमासा निरग्रा वर्षादिस्थे सृष्टिसौराब्दवृन्दे।**
**अर्कैर्निघ्ने संयुताश्चान्द्रमासाश्चैत्रादिस्थाः सृष्टितस्ते च नूनम्।।**
**संयुक्तास्ते यातचैत्रादिमासैस्त्रिंशन्निघ्ना याततिथ्यन्विताश्च।**
**तिथ्यन्ते स्वे चान्द्रवाराः पृथक्स्थानिघ्नाः कार्याः सृष्टिकल्पावमैस्ते।।**
**भक्तास्तत्स्थैश्चान्द्रवारैरवाप्ता व्यग्रा ये स्युश्चावमाख्याः क्षयाहाः।**
**हीनाः कार्यास्ते पृथक्स्थापितेषु भानोर्मध्यः सानणोऽहर्गणः स्यात्।।**

---

[१] सिद्धान्तशिरोमणि: गोला. गोलप्रशंसा श्लो. 6

[२] सिद्धान्तशिरोमणि: ग्रहनयनाध्याय: श्लो. 1 – 3

[३] सिद्धान्ततत्त्वविवेक: मध्यमा. श्लो.सं. 7 - 10

**केतकीग्रहगणिते -** [१]

**व्याभ्रभ्रेभकुशकनंदचन्द्राब्धिश्चक्राख्या रविहतशेषकं तु युक्तम्।**
**चैत्राद्यैः पृथुगमुतः शराप्तचक्रांशा युक्तादमरफलाधिमासयुक्तम्।।**
**खत्रिघ्नं गततिथियुक् शरद्गुणाभ्रांगांशोनं पृथगमुतोऽब्धिषट्क लब्धैः।**
**ऊनाहैर्वियुतमहर्गणो भवेद्वै वारः स्याद् गुणहतचक्रयुग्गणो ज्ञात् ।।**

उपर्युक्तश्लोकेषु सिद्धान्तशिरोमणौ कल्पादितः, सिद्धान्तत्त्वविवेके सृष्ट्यादितः तथा केतकीग्रह-गणिते इष्टशकादितः अहर्गणानयनस्य विधिः प्रदर्शितः वर्तते। अतः अहर्गणः नाम कल्पादितः सृष्ट्यादितः वा इष्टशकादितः सावन-दिवसानां समूहः। अहर्गणानयने सावनदिवसानामेव किमर्थं प्रयोग इत्यस्मिन् जिज्ञासायां नवविधकालमानेषु सावनमानस्य प्रत्यक्षत्वमेव कारणम्। अपि च प्रसंगेऽस्मिन् दिनमासवर्षादिनां ज्ञानविषये इयं भास्करीयोक्तिः ध्यातव्यः। तद्यथा [२]

**वर्षायनर्तुयुगपूर्वकमत्रसौरान् मासास्तथा च तिथयस्तुहिनांशुमानात्।**
**यत् कृच्छ्रसूतकचिकित्सितवासराद्यं तत् सावनाच्च घटिकादिकमार्क्षमानात्।।**

एकस्मिन् कल्पदिनैर्युगदिनैर्वा यदि ग्रहाणामेते कल्पभगणाः युगभगणाः वा भवन्ति तर्हि वर्तमानदिनसंख्यया किमिति अनुपातद्वारा तत्तग्रहस्थितिज्ञानं भवति। इदमेव अहर्गणानयनस्य प्रयोजनम् । अधुना सूर्यसिद्धान्तग्रन्थानुसारं अहर्गणानयनमुपस्थाप्यते -[३]

**अत ऊर्ध्वममी युक्ता गतकालाब्दसंख्यया।**
**मासीकृता युता मासैर्मधुशुक्लादिभिर्गतैः।।**
**पृथक्स्थास्तेधिमासघ्नाः सूर्यमासविभाजिताः।**
**लब्धाधिमासकैर्युक्ता दिनीकृत्य दिनान्विताः।।**

---

[१] केतकीग्रहगणिते मध्यमाधिकारे श्लो.. सं. 1 – 2

[२] . सिद्धान्तशिरोमणि गणिताध्याय कालमाना. श्लोक संख्या 31

[३] सूर्यसिद्धान्त: मध्यमाधिकार: श्लोक संख्या 48- 51

**द्विष्ठास्तिथिक्षयाभ्यस्ताश्चान्द्रवासरभाजिताः।**
**लब्धोनरात्रिरहिता लङ्कायामार्धरात्रिकः।।**
**सावनो द्युगणः सूर्याद्दिनमासाब्दपास्ततः।**
**सप्तभिः क्षयितः शेषः सूर्याद्यो वासरेश्वरः।।**

अर्थात् कृतयुगादनन्तरमतीतसौरवर्षमानेन गतसौरवर्षसंख्या युक्ताः कार्याः तदा ते सृष्ट्यादितः अभीष्टसौरवर्षं यावत् गतसौराब्दाः भवन्ति। द्वादशसौरवर्ष-संज्ञात्वात् गतसौराब्दाः द्वादशसंगुणिता अभीष्टवर्षादौ सौरमासाः भवन्ति। परञ्च ते चान्द्रमासतुल्याः सौरमासाः दर्शाग्र-संक्रान्तिकालयोः अन्तर्वर्त्तिना अधिमास-शेषेणाधिका भवन्ति । एवं सौरचान्द्रमासयोः अन्तरस्यैव अधिमाससंज्ञात्वात्[१] तेषां सौरमासानां चान्द्रमासकरणार्थमधिमासस्य संस्कारः अपेक्षतिः। अत्रानुपातः यत् युगसौरमासैः युगाधिमासाः प्राप्यन्ते तर्हि इष्टसौरमासैः किम्?

$$= \frac{\text{युगाधिमासाः x इष्टसौरमासाः}}{\text{युगसौरमासाः}} = \text{इष्टाधिमासाः} + \frac{\text{अधिशेषः।}}{\text{युगसौरमासाः}}$$

एभिः अधिमासैः साधिशेषै इष्टसौरमासाः योज्यन्ते तदा अभीष्टसंक्रान्ति-कालिकचान्द्रमासाः भवन्ति। अत्र पूर्वमधिशेषस्य युक्तत्वादिदानीं केवलं लब्धाधिमासा एव योज्यन्ते नाधिमासशेषमिति। पुनः ते चान्द्रमासाः त्रिंशद् गुणिता दर्शान्ते गततिथयः भवन्ति। तेषु अभीष्टदिनावधिका गततिथयः योज्यन्ते तर्हि ते गततिथ्यन्तकाले चान्द्रदिनानि भवन्तिः। परन्तु अस्माकमभीष्टं तु सावनदिनम्। अतः तेषां चान्द्रतिथिनां सावनकरणार्थमवमानयनम्। **तिथ्यन्तसूर्योदययोस्तु मध्ये सदैव तिष्ठत्यवमावशेषम्**[२] इति अवमस्य परिभाषानुसारं तिथ्यन्तकालिके अस्मिन् अहर्गणे लब्धितुल्यावमैरेव चान्द्राहर्गणो विशोध्यते चेत् अभीष्टार्कोदयकाले सावनाहर्गणो जायते। प्राप्ताहर्गणस्य  शुद्धाशुद्धज्ञानं वारेशज्ञानेनैव भवितुमर्हति

---

[१] भवन्ति शशिनो मासा: सूर्येन्दुभागणान्तरम । रविमासोनितास्ते तु शेषा: स्युरधिमासका ।। सू. सि. मध्यमाधिकारे श्लो.सं. 35

[२] . सिद्धान्तशिरोमणि: गोलाध्याय: मध्यमगति वासना श्लोक सं. 18

तथा वारेशस्य ज्ञानं **सप्तभिः क्षयितः शेषः सूर्याद्यो वासरेश्वरः** [१] इति वक्ष्यमाणप्रकारेण कर्तुं शक्यते। यथोदाहरणम् -

**1940 शकाब्दस्य माघकृष्णदशमीबुधवासरे अहर्गणानयनम्-**

1955885119**- सृष्ट्यादितः अभीष्टवर्षं यावत् सूर्याब्दाः**

x 12**- मासीकरणार्थं**

23470621428**- सृष्ट्यादितः अभीष्टवर्षारम्भे गतमाससंख्या**

**+** 9**- अभीष्टमासं यावत् गतमाससंख्या**

23470621437 -चान्द्रमासतुल्यसौरमासाः

**सौरमास्य चान्द्रमासकरणार्थम् अधिमासानयनम्-**

$\frac{\text{युगाधिमासाः} \times \text{इष्टसौरमासाः}}{\text{युगसौरमासाः}}$ = इष्टाधिमासा इति सूत्रानुसारम्-

$\frac{1593336 \times 23470621437}{51840000}$ = 721384762 अधिमासाः

23470621437 - चान्द्रमासतुल्यसौरमासाः

**+** 721384762 - अधिमासाः

24192006119 - चान्द्रमासाः

x 30 **- तिथिषु परिवर्तनार्थम्**

725760185970 - अभीष्टदर्शान्तं यावत् गततिथयः

---

[१] . सू. सि. मध्यमाधिकारे श्लो.सं. 35

725760185970 - अभीष्टदर्शान्तं यावत् गततिथयः

+24 - गततिथयः

725760185994 - अभीष्टदिनं यावत् गततिथयः

**चान्द्रतिथयः सावनदिवसेषु परिवर्तनार्थम्**

युगावमानि x इष्टचान्द्रतिथयः / युगसम्बन्धिचान्द्रतिथयः = इष्टावमानि इति सूत्रानुसारम्-

25082252 x 725760185994 / 1603000080 = 11356019318 अवमानि

725760185994 - चान्द्रतिथयः

-11356019318 - लब्धावमानि

714404166676 - सावनाहर्गणः / 7 = 4 शेषः अर्थात् बुधवासरः

अत्र सधितः 714404166676 - सावनाहर्गणः सप्तभिः विभाजिते सति शेषस्थाने 4 संख्या समायाति । अतः सप्तभिः क्षयितः शेषः सूर्यादि यो वासरेश्वरः इति सिद्धान्तवचनानुसारेण वर्षारम्भस्य वारः बुधवासरः सिद्धः । अनेन प्रकारेण यस्मिन् कस्मिन् अपि वर्षे अहर्गणानयनं कर्तुं शक्यते ।। शम् ।।

# द्वादशभावैः सह रोगाणां सम्बन्धः

**डॉ.शैलेशकुमारतिवारी**
फलितज्योतिषाचार्य:
E.mail:-Shaileshjyotirvigyan@gmail.com

**'सर्वमेव परित्यज्य शरीरमनुपालयेत्'**(१) इति वचनेन सुस्पष्टं भवति यत् मानवजीवने शरीररक्षा नूनमेव कर्तव्यम्।सर्वदु:खमयेऽस्मिन् संसारसागरे जनन-मरणचक्रावर्तगर्तपतिता: सर्वेऽपि मानवाः नानाविधरोगव्याधिना पीडिताः महत्कष्टमनुभवन्तो दरीदृष्यन्ते। इहलोके शरीरमाध्यमेनैव मानवधर्मस्य सञ्चालन-मनुपालनं वा सम्यक्तया भवति। अत: यदा शरीरमिदं स्वस्थं भवति चेत्तदा जीवने चतुर्णां पुरुषार्थानां (धर्मार्थकाममोक्षाणां) संसिद्धि: भविष्यति। प्रसङ्गेऽस्मिन् वेदपुरुषस्य नेत्रस्थानीयशास्त्रेण मानवजीवने समुत्पन्नानां विविधानां रोगाणां जन्माङ्गस्थै: द्वादशभावै: सह कीदृश: सम्बन्धो भवतीति विचारो विधीयते। भवन्त: सर्वे जानन्त्येव अस्माकं ज्योतिषशास्त्रं प्रत्यक्षशास्त्रत्त्वेन परिगण्यते। यथोक्तम्-

**अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम् ।**
**प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ** ।।(२)

अत: अनेन ज्योतिर्विज्ञानेनापि जीवने संघटितानां विविधघटनानां साकं नैकरोगज्ञानमपि कर्तुं शक्यते। मानवजीवने समुत्पन्नानां रोगाणां तन्वादिद्वादशभावै: सह सम्बन्धो भवत्येव यत: कालपुरुषस्याङ्गविभाजनक्रमे नराकारचक्रं द्वादशभागेभ्य: विभज्य ज्योतिषशास्त्राचार्यै: "शीर्षमुखबाहुहृदयेति रूपेण" विभिन्नानामङ्गानां सम्बन्ध: समुपस्थापित:। यथोक्तं लघुजातके-

**शीर्षमुखबाहुहृदयोदराणि कटिवस्तिगुह्यसंज्ञानि।**
**ऊरुजानूजङ्घा चरणवितिराशयोऽजाद्याः** ।।(३)

अनेनेदं सिद्ध्यति यत् यो भाव: सबल: तत्सम्बन्धितमङ्गं पुष्टं, भावस्य निर्बलत्वे तत्सम्बन्धितमङ्गं रोगग्रस्तं दुर्बलञ्च भवति। तद्यथा-


**कालनरस्यावयवान्पुरुषाणां कल्पयेत् प्रसवकाले।**
**सदसद्ग्रहसंयोगात्पुष्टांसोपद्रवांश्चापि।।**(४)

ज्योतिषशास्त्रे प्रतिपादितग्रहयोगा: भावानुरूपं फलप्रदातार: सन्ति। आचार्य वराहमिहिरेण स्वग्रन्थे बृहज्जातके द्रेष्काणानुरूपं शरीरस्याङ्गविभागा: निरूपिता:। तत्र प्रथमाङ्गविभाग: प्रथमद्रेष्काणानुरूपं मूर्धाद्यङ्गविभागा:, द्वितीयाङ्गविभाग: द्वितीयद्रेष्काणानुरूपं कण्ठाद्यङ्गविभागा:, तथैव तृतीयाङ्ग-विभाग: तृतीयद्रेष्काणानुरूपं बस्तिप्रभृत्यङ्गविभागा: भवन्ति। तद्यथा-

**कन्दृक्छ्रोत्रनसाकपोलहनवो वक्त्रं च होरादय-**
**स्ते कण्ठांसकबाहुपार्श्वहृदयक्रोडानि नाभिस्तत: ।**
**बस्ति: शिश्नगुदे ततश्च वृषणावुरू ततो जानुनी**
**जङ्घाङ्घ्रीत्युभयत्र वाममुदितैर्द्रेष्काणभागैस्त्रिधा ।।**(५)


अर्थात् लग्ने प्रथमद्रेष्काणे लग्नाङ्गविभागा: शीर्षादित: मुखपर्यन्तं भवन्ति। तत्र लग्नभाव: शिर:, लग्नाद्द्विर्द्वादशौ दक्षिणवामचक्षुषी, तृतीयेकादशौ दक्षिणवामनेत्रे, चतुर्थदशमौ दक्षिणवाम-नासापुटे,पञ्चमनवमौ कपोलौ, षष्ठाष्टमौ दक्षिणवामहनू, तथा सप्तमभाव: मुखमिति प्रथमोऽङ्गविभाग:। द्रेष्काणस्य प्रथमाङ्गविभाग-द्द्योतकं चक्रम्-

द्रेष्काणस्य प्रथमाङ्गविभागद्योतकं चक्रम्-




एवमेव लग्ने द्वितीयद्रेष्काणे प्राप्ते लग्नं कण्ठात् नाभिपर्यन्तं लग्नादयो भावा: भवन्ति। यथा लग्नं कण्ठ:, द्विर्द्वादशभावौ क्रमेण दक्षिणवामस्कन्धौ, तृतीयेकादशौ बाहौ, चतुर्थदशमौ पार्श्वे, पञ्चमनवमौ हृद्भागौ, षष्ठाष्टमौ उदरभागौ, सप्तमभाव: नाभिस्थानमिति द्वितीयोऽङ्गविभाग:। द्वितीयद्रेष्काणानुरूपमङ्गविभागद्योतकं चक्रम्-


द्वितीयद्रेष्काणानुरूपमङ्गविभागद्योतकं चक्रम्-




लग्नद्रेष्काणे तृतीयाङ्गविभाग: यथा- तत्र लग्नं बस्ति:,द्विर्द्वादशौ लिङ्गपायू, तृतीयेकादशौ वृषणौ, पञ्चमनवमौ जानुनी, षष्ठाष्टमौ क्रमेण दक्षिणवामजङ्घे,

सप्तमभावः पादद्वयमिति। शरीरस्य विविधाङ्गानां शुभाशुभत्वज्ञानाय एतादृश-प्रकल्पनायाः परमोद्देश्यं भवति।

**तृतीयद्रेष्काणानुरूपमङ्गविभागद्योतकं चक्रम्-**




श्रीमता वराहेण अस्य भावं प्रयोजनञ्च स्पष्टयति। तद्यथा-

**तस्मिन् पापयुते व्रणं शुभयुते दृष्टे च लक्ष्मादिशेत्**
**स्वर्क्षांशे स्थिरसंयुतेषु सहजः स्यादन्यथागन्तुकः।**
**मन्देश्मानिलजोऽग्निशस्त्रविषजो भौमे बुधे भूर्भुवः**
**सूर्ये काष्ठचतुष्पदेन हिमगौ श्रृङ्ग्यब्जजोऽन्यैः शुभम्।।**(६)

अर्थात् उपरिप्रतिपादिताङ्गविभागस्य राशिषु पापग्रहाः (सूर्य-क्षीणचन्द्र-भौम-पापान्वितबुध-शनि-राहु-केत्वादयः)भवन्ति चेत् तत्तदङ्गेषु व्रणः,तथा पापग्रहाः यदि शुभग्रहेण युताः दृष्टाश्च स्युः तत्तदङ्गे चिह्नादिकं भवन्ति। यदि पापग्रहाः स्वराशिनवांशेऽथवा स्थिरराशिनवांशे स्युस्तदा जन्मनः तत्तद्स्थानेषु व्रणः चिह्ना दिकञ्च जनयन्ति। यदि अन्यराशिनवांशगतग्रहः स्यात्तदा स्वान्तर्दशाकाले व्रणादिकं कारयति।यस्मिन्नङ्गे शनैश्चरोऽवस्थितो भवेत् तत्स्थानं पाषाणैः अथवा वातरोगेण प्रभावितो भवति। अर्थात् पाषाणैः वातरोगैश्च शरीरे व्रणादिकं स्यादिति भावः। यदि भौमः स्यात्तदाग्निना,शस्त्रेण,विषेण वा। बुधस्चेदुच्चादधस्थानपतनात्। सूर्यश्चेत् काष्ठेन, चतुष्पदप्राणिहेतुको वा। चन्द्रश्चेत् श्रृङ्ग्यभिघातहेतुकः,जलप्राणिहेतुको वा

शरीरे व्रणादिकं जानीयात्। विचारितभावानुरूपं शुभग्रहाणां स्थितिः तत्तदङ्गं पुष्टं मनोरमञ्चावगन्तव्यम्।

**तन्वादिद्वादशभावेभ्यो विचारणीयाः विभिन्नरोगाः-**

लग्नभावात् संपूर्णशरीरस्य विचारः क्रियते। संपूर्णशरीरस्यायमभिप्रायः, न केवलं बाह्याङ्गानाम् अपितु आभ्यन्तरीणावयवानां विचारोऽपि कर्तव्यः।

उदाहरणरूपेण सिंहलग्नस्य कश्चित् जातकस्याधिपतिः सूर्यः यद्यपि नेत्र-हृदय-अस्थिप्रभृतीनामङ्गानां प्रतिनिधिः भवति,तथापि समग्रशरीरस्य विचार-क्रमेऽयं लग्नेशः सूर्यः हृन्नेत्रापेक्षया अस्थीनां समधिकं प्रतिनिधित्वं करिष्यति। कथमिति चेत् हृन्नेत्रापेक्षया अस्थिनः शरीरे व्यापकता दरीदृश्यते। तथैव कर्कलग्नस्य जातकस्य लग्नाधिपतिः चन्द्रः मनस्तत्त्वस्य कारकः, तथा वक्ष-रक्तस्यापि प्रतिनिधित्त्वं करोति।तथापि संपूर्णशरीरे चन्द्रमाः रक्तस्य सर्वाधिकं प्रतिनिधित्त्वं करोति। कथमिति चेत् शरीरे रक्तः मानसिकस्थितेः तथा वक्षापेक्षया अधिकव्यापकक्षेत्रे कार्यं करोति। अनेनैव प्रकारेण भौमात् मज्जा (अस्थिसारः), बुधात् चर्मविचारः, गुरोः मेदविचारः,शुक्रात् वीर्यविचारः,मन्दात् स्नायुसम्बन्धि-विचारो विधातव्यः। यथोक्तं बृहज्जातके-

**स्नाय्वस्थ्यसृक्त्वगथ शुक्रवसे च मज्जा**
**मन्दार्कचन्द्रबुधशुक्रसुरेज्य भौमाः** ।।(७)

**द्वितीयभावाद्विचारणीयरोगाः-** भावोऽयं नेत्र-कर्ण-मुख-नासिका-दन्त-ग्रीवा-नख-जिह्वा-वाणी-मानसरोगाणाञ्च प्रतिनिधित्वं करोति। अर्थात् अस्मात् भावादेतेषां समेषां रोगाणां विचारः क्रियते। उक्तञ्चोत्तरकालामृते-

**<u>वाग्वि</u>त्तास्तिकपोषकत्त्व<u>नखसं भोज्यानि सत्यानृते</u>**
**<u>जिह्वाक्ष्य</u>म्बरवज्रताम्रमणयो मुक्ताग्रहौ कृत्रिमः** ।।(८)

अष्टमात् सप्तमः द्वितीयो भावः प्रबलमारकत्त्वेनापि गण्यते।
यथोक्तं बृहत्पाराशरहोराशास्त्रे-

**तृतीयमष्टमस्थानमायुःस्थानं द्वयं द्विज !।**
**मारकं तद्व्ययस्थानं द्वितीयं सप्तमं तथा ।।**

**तत्रापि सप्तमस्थानाद् द्वितीयं बलवत्तरम् ।**
**तयोरीशौ तत्र गताः पापिनस्तेन संयुता ।।(९)**

अस्मात् भावात् मृत्युसम्बन्धिनो विमर्शः क्रियते।अनेन सुस्पष्टं भवति यत् उपर्युक्त-रोगस्य अनियन्त्रितावस्थायां कदाचिज्जातक: पञ्चत्वं प्राप्नुयादिति। तत्र नेत्र-कर्ण-नासिका-दन्त-ग्रीवासम्बन्धिविकारा: भवितुमर्हन्ति।

**तृतीयभावाद्विचारणीयरोगा:-** अस्मात् भावात् कण्ठ-ग्रीवा-गलगण्ड-श्वास-कास-फुस्फुस-हस्त-कर्ण-पाद-चित्तभ्रम-स्वप्न-देहवृद्धि-तर्जन्यङ्गुष्ठयोर्मध्यभागसम्बन्धिन: रोगाणां विचारो भवति ।

**चतुर्थभावाद्विचारणीयरोगा:-** अस्मात् भावात् मनस्-स्वेद-हृदय-अस्थिपिञ्जर-मस्तिष्कजन्यविकृतीनां (उन्मादापस्मारादीनां) विचारा: क्रियन्ते।

**पञ्चमभावाद्विचारणीयरोगा:-** अस्मात् भावात् मन्दाग्नि-अरुचि-पित्त-उदर-वृक्क-मानस-गर्भसम्बन्धिविकारा: विचार्यन्ते।

**षष्ठभावाद्विचारणीयरोगा:-** षष्ठभाव: रोगभावत्वेन ज्ञायते। तद्यथा-

**अथ विप्र! फलं वक्ष्ये षष्ठभावसमुद्भवम्।**
**देहे रोगव्रणाद्यं तत् श्रूयतामेकचेतसा ।।** (१०)

अपि च फलदीपिकायाम्-

**रोगस्य चिन्तामपिरोगभावस्थितैर्ग्रहैर्वाव्ययमृत्युसंस्थै:।**(११)

अस्मात् भावात् कटि-आन्त्र-अश्मरी-कफ-उन्माद-व्रण-क्षय-नेत्र (दीर्घकालिक-नेत्ररोग:)-अतिशूल-मूत्रकृच्छ्र-अतिसार-प्रमेहादीनां रोगाणां विचारो भवति ।

**सप्तमभावाद्विचारणीयरोगा:-**

सप्तमभावो जायाभावत्वेन सर्वजनविदित:। तत्र स्त्रीसम्बन्धिविचार:, स्त्रिया: रूप-गुण-आयु-रोगादीनां विचारश्च क्रियते। अस्मात् भावात् प्रमेह-प्रदर-उपदंश-अश्मरी-गर्भाशय-बस्ति-वीर्य-स्त्रीपुरुषयोर्गुह्याङ्ग-मूत्र-गुदाप्रभृतयः रोगा: विचार्यन्ते। यथोक्तं बृहत्पाराशरहोराशास्त्रे-

**कलत्रपो विना स्वर्क्षं व्ययषष्ठाष्टमस्थित:।**
**रोगिणीं कुरुते नारीं तथा तुङ्गादिकं विना।।**(१२)

**अष्टमभावाद्विचारणीयरोगा:-**

मृत्युभावत्वेन भावस्यास्य गणना। अस्मात् भावात् गुप्तरोग-वीर्यविकार-अर्श-मलकंटकउपदंशसंसर्गजरोग-अण्डकोशजन्यव्याधि-मूत्रकृच्छ्रप्रभृतयोऽतिविशिष्ट शरीराभ्यन्तरीणरोगा: विचार्यन्ते। उपर्युक्तविचारितरोगेषु प्राणसंकटापन्न-त्वाज्जातक: मृत्युतुल्यकष्टं, कदाचित् मृत्युं प्राप्नोतीति भाव:।

**नवमभावाद्विचारणीयरोगा:-**

नवमो भाग्यभाव:, अस्मात् भावात् यकृतदोष:, वातरक्तविकार:, कटिप्रदेशे वेदना, स्त्रीणां ऋतुचक्रसम्बन्धितरोगा:,अस्थि-मज्जाजनितशारीरिकरोगादयो विचार्यन्ते। कालपुरुषाङ्गे नवमभाव उरो: स्थानीयभावो वर्तते। भावोऽयं यदा प्रदूषितो भवति तदा ऊरुसम्बन्धिविकारा: सञ्जायन्ते।

**दशमभावाद्विचारणीयरोगा:-**

कर्मभावत्त्वेन प्रसिद्धोऽयं भाव:। अस्मात् भावादपि केचन रोगा विचार्यन्ते। ते यथा- शारीरिकसन्धिस्थलेषु पीडा, कम्पवात:, कटिपीडा, चर्मरोग:, जानुपीडा, मतिभ्रंश: तथा अन्यवायुसम्बन्धितरोगा:।

**एकादशभावाद्विचारणीयरोगा:-** भावोऽयं लाभभावत्त्वेन ज्ञायते। अस्मात् भावात् कर्ण-जानु-जङ्घापादाद्यवयवेषु पीडा-पृष्ठीयकटे: अध: प्रदेशेषु पीडा, सितविकार:, रक्तविकार:, अस्थिभग्नता च।

**द्वादशभावाद्विचारणीयरोगा:-** जन्मकुण्डल्यां द्वादशभावो व्ययभावत्त्वेन प्रसिद्धो वर्तते। अस्मात् भावात् शारीरिक-मानसिक-आर्थिकव्ययानां विचारो विधीयते। प्रामुख्येन असहिष्णुता, ऋतुपरिवर्तनजन्यशारीरिकविकारा:, दौर्बल्यता, नेत्र विकार:, शरीरे रोगप्रतिरोधकक्षमताया: न्यूनता, निद्रा-मनोव्यथा-पादयोर्पीडा-मनोद्वेगापायादीनां व्याधिनां विचारो भवति। उक्तञ्चोत्तरकालामृते-

**निद्राभङ्गमनोव्यथेऽन्घ्रियुगलं शत्रोर्भयं बन्धनं**
**पीडामुक्तिऋणप्रमोचनगजाश्वा:पित्र्यवित्तं रिपु:।**
**स्वर्गारोहणवामनेत्रजनविद्वेषाङ्गवैकल्यता**
**जारत्वं च विवाहनष्टशयनत्यागाधिकारक्षया:।।**(१३)

एवमेव जन्माङ्गचक्रस्थै: द्वादशभावै: मानवजीवने समुत्पन्नानां विविध-रोगाणां ज्ञानं सहजरूपेण कर्तुं शक्यते।

**सन्दर्भाः-** १- कौटिल्य-नीतिशतकम्

२- बृहद्दैवज्ञरञ्जनम्,श्लोकसंख्या-२६

३- लघुजातकम्- १/०१

४- सारावली- ३/०६

५- बृहज्जातकम्- ५/२४

६- तत्रैव - ५/२५

७- बृहज्जातकम्- २/११

८- उत्तरकालामृतम्- ५/०२

९- बृहत्पाराशरहोराशास्त्रम्- ४५/२-३

१०- तत्रैव- १८/०१

११- फलदीपिका- १४/०१

१२- बृहत्पाराशरहोराशास्त्रम्- १९/०२

१३- उत्तरकालामृतम्- ५/२१

# यद्ब्रह्माण्डे तत्पिण्डे

**डा. विकास:**
सहायकाचार्य: (संविदा ) ज्योतिषविभाग:
का.सिं. दरभंगा संस्कृत विश्वविद्यालय
दरभंगा- ८४६००८

**ब्रह्माण्डे ये गुणा: प्रोक्तास्ते अस्माकं शरीरेपि संस्थिता: सन्ति।** अर्थात् अखिलब्रह्माण्डे ग्रह-नक्षत्र-तारा-देव-दैत्य-वृक्षादिषु यानि तत्त्वानि दृश्यन्ते तानि सर्वाणि अस्माकं शरीरेऽपि दृष्टिभूतानि भवन्ति । विश्वस्य सर्वमपि विज्ञानं वेदोऽस्ति। मानवशरीरं ब्रह्माण्डस्य लघुतमरूपमस्ति। अत: विश्वस्यास्य सप्तकिरणा: सप्तनद्य: सप्त ऋषय: आदय: शरीरे विद्यमाना: सन्ति। पृथ्व्यां गंगायमुनासरस्वत्य: तिस्र: मुख्या: नद्य: वर्तन्ते, तासु सरस्वती अदृश्या अस्ति तथैव मानवशरीरेऽपि इडा पिंगला सुषुम्णा च तिस्र: मुख्या: नाड्य: विद्यन्ते, तासु सुषुम्णा नाडी अदृश्या अस्ति। यथोक्तम्[1]-

**सप्त ऋषय: प्रतिहिता: शरीरे सप्त क्षरन्ति सदमप्रमादम्।**
**सप्ताप: स्वपतो लोकमीयुस्तत्रो जागृतो अस्वप्नजौ सत्रसदौ च देवौ।।**

विश्वेऽस्मिन् यत्किमपि स्थूलरूपेण दृश्यते तत्सर्वं सूक्ष्मरूपेण अस्माकं शरीरेपि अस्ति तत्पारमार्थिकशरीरं कथ्यते। पारमार्थिकशरीरं ब्रह्माण्डस्य गुणसम्पन्नमस्ति, योगिनां धारणयोग्यमस्ति। योगिन: पारमार्थिकशरीरे षट्चक्राणां चिन्तनं, ब्रह्मरन्ध्रे च भगवत: चिदानन्दरूपस्य ध्यानं कुर्वन्ति। यथा[2]-

**वक्ष्यामि च शरीरस्य स्वरूपं पारमार्थिकम्।**
**ब्रह्माण्डगुणसम्पन्नं योगिनां धारणास्पदम्।।**

---

[1]यजुर्वेद:-३४.५५

[2]गरुडपुराण-सारोद्धार-:१५.४.५

**षट्चक्रचिन्तनं यस्मिन् यथा कुर्वन्ति योगिन: ।**
**ब्रह्मरन्ध्रे चिदानन्दरूपध्यानं तथा शृणु।।**

पारमार्थिकशरीरे चतुर्दशभुवनानि सप्तपर्वता: सप्तद्वीपा: सप्तसागरा: सूर्यादिनवग्रहा: विद्यमाना: सन्ति। पारमार्थिकशरीरे मूलाधारादिषट्चक्राणि भवन्ति। ब्रह्माण्डेऽस्मिन् ये गुणा: कथिता: सन्ति ते सर्वे गुणा: शरीरेऽवस्थिता: सन्ति।ये मानवा: तान्गुणान् अन्त:स्थं कुर्वन्ति ते मानवा: विराट्स्वरूपभागिन: भवन्ति। तद्यथा-[1]

**भुवनानि च सर्वाणि पर्वतद्वीपसागरा:।**
**आदित्याद्या ग्रहा: सन्ति शरीरे पारमार्थिके ।।**
**पारमार्थिकदेहे हि षट्चक्राणि भवन्ति च।**
**ब्रह्माण्डे ये गुणा: प्रोक्तास्तेऽप्यस्मिन्नेव संस्थिता: ।।**

**शरीरे चतुर्दशलोका:-**

ब्रह्माण्डेऽस्मिन् चतुर्दशलोका: सन्ति तेषु चतुर्दशलोकेषु पृथ्व्या: अध: सप्तलोका: सन्ति। ते च यथा-तललोक: वितललोक: सुतललोक: महातललोक: तलातललोक: रसातललोक: पाताललोक: च। लोकस्य क: भाग: शरीरस्य कस्मिन् भागेऽवस्थितोऽस्ति तल्लिख्यते। यथा- पादाधस्तात्तललोक: पादोर्ध्वं वितललोक: जानुनो: सुतललोक: सक्थिभागे महातललोक: सक्थिमूले तलातललोक: गुह्यभागे रसातललोक: कटिप्रदेशे च पाताललोक: सन्ति। अनेन प्रकारेण पादाधस्तात्कटिपर्यन्तं सप्त अधोलोका: कथिता: सन्ति। यथा[2]-

**पादाधस्तात्तलं ज्ञेयं पादोर्ध्वं वितलं तथा।**
**जानुनो: सुतलं विद्धि सक्थिदेशे महातलम्।**
**तलातलं सक्थिमूले गुह्यदेशे रसातलम्।**
**पातालं कटिसंस्थं च सप्तलोका: प्रकीर्तिता: ।।**

---

[1]गरुडपुराण-सारोद्धार-:१५.५३-५४

[2] गरुडपुराण-सारोद्धार-:१५.५६.५७

भूर्लोकः भुवर्लोकः स्वर्लोकः महःलोकः जनलोकः तपोलोकः सत्यलोकः च। नाभिमध्ये भूर्लोकः नाभितः उपरि भुवर्लोकः हृदये स्वर्लोकः कण्ठदेशे महर्लोकः मुखे जनलोकः ललाटे तपोलोकः ब्रह्मरन्ध्रे च सत्यलोकः स्थिताः सन्ति। एवम्प्रकारेण पारमार्थिकशरीरे चतुर्दश लोकाः स्थिताः विद्यन्ते। यथा[1]-

**भूर्लोकं नाभिमध्ये तु भुवर्लोकं तदूर्ध्वके।**
**स्वर्लोकं हृदये विद्यात् कण्ठदेशे महस्तथा।।**
**जनलोकं वक्त्रदेशे तपोलोकं ललाटके।**
**सत्यलोकं ब्रह्मरन्ध्रे भुवनानि चतुर्दश।।**

**शरीरे सप्तपर्वताः-**

ब्रह्माण्डेऽस्मिन् सप्तपर्वताः विद्यन्ते। ते च यथा-मेरुपर्वतः मन्दरपर्वतः कैलाशपर्वतः हिमाचलपर्वतः निषधपर्वतः गन्धमादनपर्वतः रमणपर्वतः च। मानवशरीरस्थत्रिकोणे मेरुपर्वतः संस्थितः, कोणे मन्दरपर्वतः, दक्षकोणे कैलासपर्वतः, वामकोणे हिमाचलपर्वतः, उर्ध्वरेखायां निषधपर्वतः, दक्षायां गन्धमादनपर्वतः, वामरेखायां च रमणपर्वतः वर्तन्ते। पारमार्थिकशरीरे सप्तैते कुलपर्वताः सन्ति। यथा[2]-

**त्रिकोणे संस्थितो मेरुरधः कोणे च मन्दरः ।**
**दक्षकोणे च कैलासो वामकोणे हिमाचलः ।।**
**निषधश्चोर्ध्वरेखायां दक्षायां गंधमादनः ।**
**रमणो वामरेखायां सप्तैते कुलपर्वताः ।।**

**शरीरे सप्तद्वीपाः-**

ब्रह्माण्डेऽस्मिन् सप्तद्वीपाः सन्ति। ते च यथा- जम्बूद्वीपः, शाकद्वीपः, कुशद्वीपः, क्रौंचद्वीपः, शाल्मलीद्वीपः,गोमेदद्वीपः, पुष्करद्वीपो च। एते सप्तद्वीपाः सूक्ष्मरूपेण पारमार्थिकशरीरेऽपि अवस्थिताः सन्ति। कस्मिन् स्थाने को द्वीपः अस्ति

[1] गरुडपुराण-सारोद्धार-:१५.५८.५९

[2] गरुडपुराण-सारोद्धार-:१५.६०.६१

तत्कथ्यते। अस्थिसु जम्बू:द्वीप: अस्ति, मज्जासु शाकद्वीप: संस्थित:वर्तते, मांसे कुशद्वीप: स्थितो विद्यते, शिरासु क्रौंचद्वीपो जानीयत्, त्वचायां शाल्मलीद्वीपोवर्तते, रोमसंचये गोमेदद्वीपो विद्यते, नखेषुच पुष्करद्वीपो विद्यते। भारतदेश: जम्बूद्वीपान्तर्गतेऽस्ति। यथा[1]-

**अस्थिस्थाने भवेज्जम्बू: शाको मज्जासु संस्थित: ।**
**कुशद्वीप: स्थितो मांसे क्रौंचद्वीप: शिरासु च ।।**
**त्वचायां शाल्मलीद्वीपो गोमेदो रोमसंचये ।**
**नखस्थं पुष्करं विद्यात् सागरास्तदनन्तरम् ।।**

**मानवशरीरेसप्तसागरा:-**

पृथ्व्यां 71%जलमस्ति, तथैव मानवशरीरेऽपि 71% जलमस्ति। अर्थात् पृथ्व्यां यत्किमपि दृश्यते तत्सर्वं मानवशरीरेऽपि तथैवास्ति। विश्वेऽस्मिन् सप्तसागरा: सन्ति। तेषां नामानि इत्थं प्रकारेण सन्ति। ते च यथा- क्षारोद: क्षीरोदसागर: सुरोदधि: घृतसागर: रसोदधि दधिसागर:स्वादूद: च।

मूत्रे क्षारोदसागर:, क्षीरे दुग्धे वा क्षीरोदसागर:, श्लेष्मसंस्थे कफे वा सुरोदधिसागर:, मज्जायां घृतसागर:, शरीरस्थरसे रसोदधिसागर:, शोणिते रक्ते वा दधिसागर:, लम्बिकास्थाने (कण्ठस्य लम्बमानभागे उपजिह्वायां काकलेवा) च स्वादूदो वर्तन्ते। यथा-[2]

**क्षारोदो हि भवेन्मूत्रे क्षीरे क्षीरोदसागर: ।**
**सुरोदधि: श्लेष्मसंस्थो मज्जायां घृतसागर: ।।**
**रसोदधिं रसे विद्याच्छोणिते दधिसागर: ।**
**स्वादूदो लम्बिकास्थाने जानीयाद् विनतासुत।।**

**मानवशरीरे नवग्रहा:-**

---

[1] गरुडपुराण-सारोद्धार-:१५.६२.६३

[2] गरुडपुराण-सारोद्धार-:१५.६४.६५

ब्रह्माण्डे सूर्यादिनवग्रहा: वर्तन्ते। पारमार्थिकशरीरे ग्रहमण्डलम् अवस्थित-मस्ति। तद्यथा- नादचक्रे सूर्य: स्थित: बिन्दुचक्रे चंद्रमा: वर्तते, लोचने कुजो ज्ञेयो हृदये बुध: प्रकीर्तित: विष्णुस्थाने नाभिस्थितमणिपूरकचक्रे वा गुरु: विद्यते, शुक्रे शुक्रो व्यवस्थित:। नाभिस्थाने गोलके वा शनैश्चर: स्थितो, मुखे राहु: प्रकीर्तित:, वायुस्थाने च केतु: स्थित: विद्यते। अनेन प्रकारेण स्वकीये शरीरे सम्पूर्णब्रह्माण्डस्य चिन्तनं कर्तव्यम्। यथा-[1]

**नादचक्रे स्थित: सूर्यो बिन्दुचक्रे च चंद्रमा:।**
**लोचनस्थ: कुजो ज्ञेयो हृदये ज्ञ: प्रकीर्तित: ।।**
**विष्णुस्थाने गुरुं विद्याच्छुक्रे शुक्रो व्यवस्थित:।**
**नाभिस्थाने स्थितो मन्दो मुखे राहु: प्रकीर्तित:।।**
**वायुस्थाने स्थित: केतु: शरीरे ग्रहमण्डलम्।**
**एवं सर्वस्वरूपेण चिन्तयेदात्मनस्तनुम् ।।**

मानवदेहस्य छिद्रेषु आकाश:, शरीरस्य वायौ वायु:, देहस्य नेत्रयो: तेज:, देहस्य जले जलम्, देहस्य पार्थिवभागे पृथ्वी, देहस्य मनसि चन्द्रमा:, देहस्य श्रोत्रयो: दिशा, देहस्य पादयो: विष्णु:, देहस्य वाचि अग्नि:, देहस्य गुदायां मित्रदेव:, देहस्य उपस्थे प्रजापति: च वसति। यथा-[2]

**सर्वमात्मनि संपश्येत्सच्चासच्च समाहित:।**
**सर्वं ह्यात्मनि संपश्यन्नाधर्मे कुरुते मन: ।।**
**आत्मैव देवता: सर्वा: सर्वमात्मन्यवस्थितम्।**
**आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम्।।**
**खं सन्निवेशयेत्खेषु चेष्टनस्पर्शनेऽनिलम्।**
**पक्तिदृष्ट्यो: परं तेज: स्नेहेऽपो गां च मूर्त्तिषु।।**

---

[1] गरुडपुराण-सारोद्धार-:१५/६६-६८

[2] मनुस्मृति- १२/१८-२१

**मनसीन्दुं दिश: श्रोत्रे क्रान्ते विष्णुं बले हरम्।**
**वाच्यग्निं मूत्रमुत्सर्गे प्रजने च प्रजापतिम्।।**

अत: ब्राह्ममुहूर्त्ते उत्थाय पद्मासने स्थित्वा षट्चक्राणां जागरणाय ध्यानं करणीयम्। यथा-[१]

**सदा प्रभातसमये बद्धपद्मासन: स्थित: ।**
**षट्चक्रचिन्तनं कुर्याद्यथोक्तजपाक्रमम् ।।**

ब्राह्ममुहूर्त्ते उत्थाय स्वकीये शरीरे भगवत: आनन्दस्वरूपस्य स्वप्रकाशस्य सनातनरूपस्य ध्यानं करणीयम्। स्वेन प्रयत्नेन एतद् न करणीयम्। गुरूपदेशेन मन: निश्चलतां नयेत्। यतोहि गुरूपदेशं विना साधकस्य पतनं भवति। एवम्प्रकारेण अंतर्यागं कृत्वा बहिर्यागस्य अनुष्ठानं कर्तव्यम्। अन्तर्यागं मानसोपचारै: पूर्वोक्तचक्रेषु श्रीगणेशादिपूजनेन भवति। बहिर्यागं यथालब्धोपचारै: श्रीहरिहरपूजनेन च भवति। अत: शरीरशोधनेन, शरीरस्थसूक्ष्मदेवानां ध्यानेन, भगवत्पूजनं भवतीति दिक् ।

**मानुष्यं वरंवंशजन्म विभवो दीर्घायुरायोग्यता,**
**सन्मित्रं सुसुतः सती प्रियतमा भक्तिश्च नारायणे।**
**विद्वत्वं सुजनत्वमिन्द्रियजयः सत्पात्रदाने रति**
**ते पुण्येन विना त्रयोदशगुणाः संसारिणां दुर्लभाः**

**सानन्दं सदनं सुताश्च सुधयः कान्ता न दुर्भाषिणी,**
**सन्मित्रं सुधनं स्वयोषितिरतिश्चाज्ञापराः सेवकाः।**
**आतिथ्यं शिवपूजनं प्रतिदिनं मृष्टान्नपानं गृहे,**
**साधोः सङ्गमुपासते हि सततं धन्ये गृहस्थाश्रमाः।।**

**- सम्पादकः**

---

[१] गरुडपुराण-सारोद्धार-:१५/६९

# व्यक्तित्वविकासे ज्योतिषशास्त्रस्यावधारणा

**डॉ० सन्तोष डोगरा**
शिक्षाविभाग सहायकाचार्या
रा० सं० सं० जम्मू परिसर
Email- santoshgodra1975@gmail.com

मनोविज्ञाने प्रकरणवशाद् मानवः एव व्यक्तिशब्देन अभिधीयते। अमरकोशानुसारेण **जातिर्जातिं च समान्य व्यक्तिरस्तु पृथगात्मना** इति। अर्थात् व्यक्तौ मानवे स्थिताः ये साधारणासाधारणगुणाः ते तम् अन्येभ्यो मानवेभ्यः एव मानवगतव्यक्तित्वेन अवगम्यते । आंग्लभाषायां personality इति उच्यते । अयं शब्द: persona इति ग्रीकभाषातः निष्पन्नः, यस्यार्थः भवति आवरणमिति। एतस्य कृतेऽपि mask (मुखौटा) इति पदं व्यवह्रीयते। persona इत्यस्यार्थः मानवस्य असाधारणगुणाः इति । स्वस्य व्यक्तित्वमाध्यमेनैव मानव अन्येषामुपरि प्रभाव-विस्तारं करोति।

**व्यक्तित्वविकासः** ( Development of personality ) -

व्यक्तित्वघटनं विकासस्य विविधास्ववस्थासु भवति। व्यक्तित्वेऽस्मिन् अन्त-र्निहिताः कारकाः आनुवंशिकेभ्यः पर्यावरणीयेभ्यश्च तत्त्वेभ्यः सम्बद्धाः भवन्ति। व्यक्तित्वविकासस्य प्रसङ्गे प्रमुखमतत्रयं प्रचलति। तद्यथा -

> मनोविश्लेषणसिद्धान्ताः (Psyco- Anytic Theory)

> अधिगमसिद्धान्तः (Learning theory)

> भूमिकासिद्धान्तः (Role theory)

मनोविश्लेषणवादिनां मते व्यक्तित्वविकासः ( Devolpment of personality According to Psyco-Analytic) -

व्यक्तित्वविकासस्य मनोविश्लेषणमतस्य प्रतिपादकफ्रायडमहोदयो आसीत् । मनो विश्लेषणवादिमतानुसारं व्यक्तित्वविकासे विशिष्ट सातत्यं भवति, यो हि बाल्यावस्थातः स्पष्टं प्रतीयते। एवञ्च जनस्य सामाजिकसांस्कृतिकसन्दर्भे च तस्य व्यक्तित्वं निर्मीयते। अस्मिन् विकासे पञ्चावस्थाः परिलक्ष्यन्ते। तद्यथा -

1. **मुख्यावस्था** (oral stage ) - अवस्थेऽयं जीवनस्य प्रथमवर्षात्सम्बन्धी वर्तते। एतस्यामवस्थायामोष्ठमुखयोः माध्यमेन सुखमनुभूयते। एषः **मुखकामुकता** (orality) इति नाम्नाऽपि प्रसिद्धो वर्तते। एतस्यां शोषण, भक्षणम्, अङ्गुष्ठस्य चोषणमादयः समागच्छन्ति। दन्तानामाविर्भावे सति कर्तनक्रियायां सुखं प्राप्यते।

2. **गुदीयावस्था** ( Anal Stage) एषा अवस्था शिशोर्जीवनस्य द्वितीयवर्षादारभ्य एकवर्षपर्यन्तं प्रचलति। एतस्यामवस्थायां शिशुः मलधारणस्य, मलनिष्कासनस्य, पेशीयनियन्त्रणस्य च प्रक्रियासु सुखमनुभवति।

3. **लैङ्गिकाऽवस्था** ( Phallic stage ) - इयमवस्था जीवनस्य तृतीयवर्षादारभ्य पञ्चवर्षीयावस्थां यावत् प्रचलति। एतस्यां बालकः लिङ्गस्य उत्तेजनायाः, अतिकल्पनायाश्च माध्यमेन सुखं प्राप्नोति। एतस्यामेवास्थायां मातुः पुत्रं प्रत्याकर्षणविषयिणी 'इडिपलग्रन्थिः' (0edipal complex ) तथा च पितुः पुत्री प्रति स्नेहविकासिनी **इलेक्ट्राग्रन्थिः** ( Electra comlex ) निर्मीयते। फ्रायडमहोदयानुसारम् एतयोः ग्रन्थयोः कारणादुत्पन्नानाम् अन्तर्द्वन्द्वानां सफलं समाधानं व्यक्तित्वविकासाय आवश्यकं भवति।

4. **कामप्रसुप्ति अवस्था** (Latency Stage ) - कालोऽयं सुषुप्ताऽवस्थायाः द्योतको भवति। एतस्य कालस्यारम्भो बालकानां जीवनस्य पष्ठवर्षतः यौवनारम्भं यावत् भवति। एतस्यामवस्थायां कामेच्छाया तु अस्थायिरूपेण दमनं भवति। अत्र बालकः बाह्यजगतमाध्यमेन सुखमनुभवति।

5. **जननाङ्गीयाऽवस्था** ( Genital Stage ) - अवस्थेऽयं किशोरावस्थादारभ्य प्रौढावस्थापर्यन्तं प्रचलति। एतस्यां जनो विषमलिङ्गीजनेन साकं मैथुनक्रियया सुखं प्राप्नोति ।

**अधिगमसिद्धान्तवादिनां मते व्यक्तित्वविकासः** (Development of personality According to Learning Theory)

अधिगमसिद्धान्तानुसारं व्यक्तित्वविकासे पुरस्कारे दण्डे वा निर्भरति। एवं जनानां स्वभावं, विभेदीकरणं, सामान्यीकरणं, अभिवृतयोः मूल्यश्चेति रूपेणार्जितं भवति। यथा अधिगमसिद्धान्तेषु उपद्दीपकानुक्रिययोः सम्बन्धनिमित्त-व्यवहारस्य व्यक्तित्वस्य च महत्त्वपूर्णपक्षो भवति। तेनैव प्रकारेण व्यक्तित्वस्य विविधानि विशेषकानि अधिगमस्य प्रतिफलानीति मन्यन्ते।

*** भूमिकासिद्धान्तवादिनां मते व्यक्तित्वविकास:-**

Development of personality According to Role Theory )-

प्रत्येकजनः विशिष्टभूमिका निर्वाहणाय समुद्यतो भवति। तस्य भूमिकेऽयं पूर्वनिर्धारिता भवति। कस्यचिद् विशिष्टस्य राष्ट्रस्य परिवारस्य, पुरुषस्य, नार्यः वा भूमिका निर्वहति। एतासु भूमिकासु जनस्य स्वतन्त्रता परिसीमितैव भवति, यतो हि जन्मनः पूर्वमेव एतत् सुनिश्चितं भवति यत्, स कुत्र वासं करिष्यति? कां भाषां वदिष्यति? इति। स: आत्मनः पराश्रयावस्थायामेव वयस्केभ्यः औपचारिका-नौपचारिकरीत्या भूमिका निर्वहणस्य विधिमधिगच्छति। जनानां व्यक्तित्वविकास: एतस्मिन् रूपे भवति । येन उपयुक्तभूमिकायाः निर्वाहणविधिः सरलतया प्रयुज्यते। ज्योतिषमिदं कालविज्ञापकशास्त्रम्। मुहूर्तं बोधयित्वां क्रियमाणा: यज्ञादिक्रिया-विशेषाः फलाय कल्पयन्ते। तन्मुहूर्तज्ञानञ्च ज्योतिषायत्तम् । अतोऽस्य ज्योतिष-शास्त्रस्य वेदाङ्गत्वं स्वीकृतम्।

**"वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।**

**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञम्" ।।**

-(वेदाङ्गज्योतिषम् ३) ।

यज्ञभागाः सन्ति बहुविधाः। केचन यज्ञा एवं विधाः नीता ये सम्वत्सरसम्बन्धिनः सन्ति। केचन तिथि- मास- पक्ष- नक्षत्र- परकाः सन्ति। अतः चतुर्णामपि वेदानां पृथक्-पृथग् ज्योतिषशास्त्रमासीत्। तेषु सामवेदस्य ज्योतिषशास्त्रं नोपलभ्यते।।

ज्योतिषशास्त्रविदोऽपि जन्मराश्यनुगुणं व्यक्तित्वं प्रकाशयन्ति-

| | |
|---|---|
| मेषः (Aries ) | तुला (libra) |
| वृषभः (Taurus) | वृश्चिकः (Scorpio) |
| मिथुनः (Gemine ) | धनु: (Sagitarius ) |
| कर्कटः ( cancer ) | मकर: (Capricorn ) |
| सिंहः ( leo ) | कुम्भः ( Aquarius ) |
| कन्या (Virgo) | मीनः ( Pisces ) |

राशि: - नक्षत्राणां समूहः राशि: कथ्यते । राशि: आकाशे भ्रमणं करोति। ज्योतिष-शास्त्रानुसारेण द्वादशराशयः भवन्ति।

कालपुरुषस्य अंगानि -

**शीर्षमुखबाहुहृदयोदराणि कटिवस्तिगुह्यसंज्ञानि।**

**उरु जानु जङ्घे चरणाविति राशयोऽजाद्याः ॥** (लघुजातकम् १/४ )

अर्थात् मेषादिक्रमेण मेषः- शीर्षः, वृषः - मुखं, मिथुनः-बाहुः, कर्कः -हृदयं, सिंहः-उदरं, कन्या- कटिः, तुला- वस्ति, वृश्चिकः- गुप्ताङ्गः, धनुः- उरुः, मकरः- जानुः, कुम्भः- जङ्घा चरणपर्यन्तं, मीनः- चरणम्।।

**राशीनां वर्णाः -**

**अरूणसितहरितपाटलपाण्डविचित्राः सितेतरपिशङ्गौ।**
**पिङ्गलकर्बुरबभुकमलिना रूचयो यथासंख्यम्।।** (लघुजातकम् १/ ६ )

अर्थात् मेषः- अरुणः, वृषः- श्वेतः, मिथुनः- हरितः, कर्कः- पीतमिश्रितः (रक्तः), सिंहः-पीत- मिश्रितश्वेतः, कन्या- विचित्रः, तुला- कृष्णवर्णः, वृश्चिकः- सुवर्णः, धनुः- पिङ्गलः, मकरः- कर्बुरः, कुम्भः-भृकः, मीनः- मलिनः।।

**राशीनां स्त्रीपुरुषसंज्ञा एवं दिशा-**

**पुंस्त्री- क्रूराऽक्रूरो चर- स्थिर- द्विस्भावसंज्ञाश्च।।**
**अजवृषमिथुनकुलीराः पञ्चमनवमैः सहैन्द्रयाद्याः॥**

अर्थात् मेषः- पुरुष, क्रूरः, वृषः- सौम्यः एवं स्थिरः, मिथुनः- क्रूरः एवं द्विस्वभावः, कर्कः सौम्यः एवं चरः, सिंहः- क्रूरः एवं स्थिरः, कन्याः- सौम्यः एवं द्विस्वभावः, तुला- क्रूरः एवं चरः, वृश्चिकः- सौम्यः एवं स्थिरः, धनुः- क्रूरः एवं द्विस्वभावः, मकरः- सौम्यः एवं स्थिरः धनु- क्रूरः एवं द्विस्वभावः, मकरः- सौम्यः एवं चरः, कुम्भः- क्रूरः एवं स्थिरः, मीनः- सौम्यः एवं द्विस्वभावः ।

मेषः, मिथुनः, सिंहः, तुला, धनुः, कुम्भः, - **पुरुषः**।

वृषः, कर्कः, कन्या, वृश्चिकः, मकरः, मीनः- **स्त्री**।

**ग्रहाणां विचारः-** **"रवीश्चन्द्रो धरापुत्रः सोमपुत्रो वृहस्पतिः।**
**भृगुः शनैश्चरौ राहुः केतुश्चैते ग्रहा नव"।।**

सूर्यः, चन्द्रः, मङ्गलः, बुधः, बृहस्पतिः, शुक्रः, शनिः राहुः, केतुश्च नवग्रहाः सन्ति। व्यक्ते व्यक्तित्वविकासे बुधग्रहस्य सहाय्यं भवति। ग्रहोऽयं सुन्दरः। एवं नपुंसकग्रहोऽपि मनुते। कस्यापि व्यक्तेः व्यक्तित्वं सामान्यतया निर्दिशति। एवं तर्कशक्तिः, अनुभवः, मानसिकशक्तिः, संरक्षणशक्तिः, लेखनशैली, बौधिकक्षमता, व्यवहारः, चिन्तनशैलीः बुधग्रहेन क्रियते। यदि कस्यापि बुध उत्तमस्ति तर्हि सः कुशलः वक्ता, उत्तमा लेखनशैलीयुक्तः तथा सामाजिकतायां विश्वसनीयः । सः वृहत्संरचनाकार्ये तथा व्यवसायकरणे समधिकां रुचिं जनयति। बुधप्रधानजातकः

मूल्यव्यस्थासु तथा च बाह्यकार्येषु निपुणो भवति। स स्वकीयवाग्मितया आकर्षयति। यदि बुध: राहुणा संयुत: भवति तदा जातकस्य कृते उत्तम: न भवति। तेषु नकारात्मकविचारस्य आगमनं समधिकरूपेण भवति। स प्रकृत्या कस्यापि वार्ता निरस्तीकर्तुं वांछति। स: प्रकृत्या शंकायुतो भवति। स: कस्यचिदपि वार्तायां न आगच्छति। स: कुशलराजनीतिज्ञ: भवति। तस्य विचारे पवित्रताया आगमनं न भवति। राहुः पापग्रह: वर्तते। राहो अवधारणा अस्ति यत्- अहं येन ग्रहेण संयुतो भवामि तदुपरि स्वीयं प्रभावं स्थापयामि । राहुणा संयुत: बुध: शंकया विश्वासात् अविश्वासं प्रति जिज्ञासां करोति। बुधचन्द्रयोश्च युति: सूर्य-शनिसंयुतिर्वद् भवति । अनयो: पिता पुत्रयो: सम्बन्धः भवति परन्तु उभयोर्मध्ये शत्रुवत् व्यवहार: दृश्यते। तथैव बुध- चन्द्रौ शुभग्रहौ स्तः। अनयोः बौद्धिकतायाः समावेशनं भवति। चन्द्रमा शीतग्रह:। यदि व्यक्ते: गुप्तसूचनायाः अभिज्ञानं भवति तदा स: सर्वत्र जनान् संसूचयति। अस्थिरत्वमाचारति । यदि बुधमंगलयोः युति: भवति, तर्हि वाण्या तीव्रता आगच्छति। तस्य वाणी तीरवत् गच्छति । स स्वकीयं प्रदर्शनं शीघ्रतया करोति, यतोहि तस्य वाण्यां बलं तेजश्च भवति। स: सक्रियो भवति। यदि बुधवृहस्पतयोः युति: भवति तर्हि व्यक्तेः व्यक्तित्वं नैतिकतायुतं भवति। स मौलिकं मुल्यं संग्रह्य चलायमानं भवति। स आध्यात्मवादीः, शुभलक्षण- युक्तः, तथा नैतिकतायाः परं न गच्छति। स कस्यापि कृते सुविचारं संस्थाप्यति। अनेन एव स कार्यस्य प्रदर्शनं करोति।

यदि बुधशुक्रयोः युतिः भवति तदा तस्य पैशाचवत् संकल्पना, बेलासंभावना भौतिकवादी स्वभावश्च भवति। प्रकत्या तादृशं प्रदर्शन करोति। याद बुधस्य शनैश्चरेण सह युतिः भवति तदा तस्य चिन्तन उच्चस्तरीयं भवति। स कस्योपरि आश्रितं न भवति । यदि बुधस्य अर्कतो युतिः भवति तर्हि रहस्यात्मकरूपेण कार्यं करोति । तस्मिन् आत्मबलं भवति। बुधः केतो: प्रतिफलं ददति। बुधः सुन्दरमधिकं तर्हि तस्य व्यक्तित्वमपि तादृशं सुन्दर भवति। प्रत्येकस्मिन् क्षेत्रे कुशलकार्यकर्ता भवति । स एकाकी कदापि न भवति । यदि चन्द्रमा उचितस्थितौ वर्तते चेत्

कर्कराशौ तिष्ठति तर्हि निश्चितरूपेण स स्वकीये स्थाने बलवान् भवति । व्यक्तिः निर्भयं भविष्यति। तस्य मनसि किञ्चित् भयादिकं न आगच्छति। एवं दृष्ट्या स व्यक्तिः मानसिकवलेन आत्मबलं प्राप्नोति । बुधः लग्ने अस्ति चेत् जातकः धीबली भविष्यति। गुरुः केन्द्र अस्ति तर्हि ज्ञानी व्यक्ति भवति। अनेन प्रकारेण कार्यक्षेत्रे शिक्षाक्षेत्रे उत्तमं प्रदर्शनं करिष्यति। एवम्प्रकारेण राशिगुणं ग्रहाणां गुणं व्यक्तित्वं विकासे महद्योगदानं करोतीति ।

**सन्दर्भग्रन्थसूची-**

• आधुनिक सामान्य मनोविज्ञान- अरुण कुमार सिंह
* शिक्षा मनोविज्ञान - पी० डी० पाठक
* मनोविज्ञान - बी० के मिश्रा
* ज्योतिष दर्पण- श्रीवासुदेवगुप्तः
* ज्योतिषचिकित्साविज्ञानामृतम्- पं• अखिलेश कुमार शर्मा
* भारतीय ज्योतिषशास्त्रस्येतिहासः - आचार्य लोकमणि दहाल
* ज्योतिर्निबन्धादर्शः- डॉ० शत्रुघ्न त्रिपाठी

# वेदेषु-ज्यौतिषशास्त्रम्

**प्रकाशरंजनमिश्रः**

**प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते** इत्यादि वचनानुसारं ज्योतिषशास्त्रस्य किमपि प्रयोजनं भवत्यैव। अभियुक्तानां मानसशङ्कानिवारणार्थं तस्योपस्थापन-मवश्यमेव कर्तव्यम्। यथा-

**सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित् ।**
**यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते ।।**

धर्मार्थकाममोक्षेषु पुरुषार्थचतुष्ट्येषु परमपुरुषार्थस्य मोक्षस्य प्राप्तिः विद्यया सम्भवति। सा विद्या पराऽपरा चेति द्विधा। तत्र पराविद्यान्तर्गतं ज्योतिषशास्त्रं-वेदाङ्गशास्त्रमिति विदुषां मतम्। तत्र षडङ्गेषु ज्योतिषं चक्षुः स्थानीयमस्ति। यथा उक्तं पाणिनीयशिक्षायां-

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।**[1]
**शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**

**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**[2]

**इतोऽपि -**

**ज्योतिः कल्पं निरुक्तं च शिक्षा व्याकरणं तथा ।**

**छन्दोविचितिरेतानि षडङ्गानि विदुः श्रुतेः ।।**[3]

वेदविहितकर्मसम्पादनाय तथा च सूर्यमण्डलस्य प्रकारनिर्णायकं, समयज्ञापकं ज्योतिश्शास्त्रं चक्षुः स्वरुपम्। ज्योतिषशास्त्रं ज्ञानरुपी शरीरस्य

नेत्रमित्युच्यते। यथा नेत्रं विना शरीरमपूर्णं व्यर्थंच,तथैव ज्योतिषज्ञानं विना सर्वमपूर्णं व्यर्थञ्च भवति। उक्तं च प्रश्नमार्गग्रन्थे-

**वेदस्य चक्षु: किलशास्त्रमेतत्प्रधानताऽङ्गेषु ततोऽस्य युक्ता।**

**अङ्गैर्यतोऽन्यैरपि पूर्णमूर्तिश्चक्षुर्विना क: पुरुषत्वमेति।।**[4]

**श्रीनारदमतानुसारं अस्य शास्त्रस्य ब्रह्मैव कर्ता।**

**विनैतदखिलं श्रौतस्मार्त कर्म न सिद्ध्यति।**

**तस्माज्जगद्धितायेदं ब्रह्मणा रचितं पुरा।।5**

महर्षिनारद: ज्योषशास्त्रस्य भेदं कृत्वा प्रयोजनं कथयति यत्-

**सिद्धान्त संहिता होरारुपस्कन्धत्रयात्मकम्।**

**ज्यौति: शास्त्रं विनैतन्न श्रोतस्मार्तं च सिद्ध्यति।।6**

एवं प्रकारेण वैदिककालात् प्रवर्धित: अयं ज्योतिश्शास्त्रपरिसर: भूत-वर्त्तमान-भविष्यज्ञापक: भाग्यनिर्णायक: होरा-सिद्धान्त-संहितादिस्कन्धत्रयेषु विभक्तो भवति। केषाञ्चिन्मतानुसारेण अस्य पञ्चस्कन्धा: पञ्चाङ्गानि वा सम्भवन्ति। यथा- **"होरा-सिद्धान्त-संहिता-प्रश्नश्शकुनश्चेति"**

वेदे ज्योतिषशास्त्रस्य आवश्यकता तथा महत्त्वविषये भास्कराचार्य : स्वभावना प्रदर्शयति।

तद्यथा- **वेदास्तावद्यज्ञकर्मप्रवृता यज्ञा: प्रोक्तास्ते तु कालाश्रेण।**

**शास्त्रात्स्मात् कालबोधो यत: स्याद् वेदाङ्गत्वं ज्योतिषस्योक्तस्मात्।।7**

पुनरपि भास्कराचार्य: कथयति यत् ज्यौतिषशास्त्रं वेदाङ्गमेव इति।

उक्तं च - **वेदा हि यज्ञार्थमभिप्रवृता कालानुपूर्वा विहिताश्च यज्ञा:।**

**तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञम्।।8**

अत: कालविधानशास्त्रं ज्यौतिषशास्त्रमिति। अमुमेवाशयं भास्करेणापि प्रदर्शितम्। अथर्ववेदे प्राप्यते यत् पूर्णोऽयं ब्रह्माण्ड: काले एवं गतिमान् इति।

यथा- **पूर्ण: कुम्भोऽधिकाल अहिस्तत् पश्यामो बहुधा नो सन्त:।**

**य इमा विश्वानि भुवनानि प्रत्यङ्गकालस्तमाहु: परमे व्योमन्।।9**

ज्योतिषश्शास्त्राध्ययनात् ग्रह-नक्षत्र-तारादीनां सम्यक् तथ्यमुपलभ्यते। ग्रहाणां गति:, स्थिति:, अयनांश इत्यादिगणितविषया: शुभाशुभसमयनिर्णय:, मुहूर्त्तनिर्णय: फलज्ञानञ्च ज्योतिश्शास्त्रान्तर्गता:। मानवजीवनस्य सुख-दु:ख-इष्टानिष्ट-उन्नत्यवनति-भाग्योदयादिशुभाशुभवर्णनमपि ज्योतिषश्शास्त्रस्य प्रयोजनं महत्त्वं च स्थापयति।

**यथा शिखा मयूराणां नागानां मणयो यथा।**

**तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्धनि स्थितम्।।10**

## सन्दर्भसूची

1.पाणिनीयशिक्षा - 42
2.पाणिनीयशिक्षा - 43
3.प्रश्नमार्ग:- 1/10
4.प्रश्नमार्ग:- 1/12
5.नारदसंहिता- पृ.1/7
6.नारदसंहिता-पृ.1/4
7.सिद्धान्तशिरोमणि:
8.अथर्ववेद: - 4/22
9. सिद्धान्तशिरोमणि:
10.वेदाङ्गज्योतिषम्

# ग्रहणविवेचनम्

**कुन्दनकुमारझा:**
गणितज्योतिषाचार्य:
काशी-हिन्दू-विश्वविद्यालय:, वाराणसी

ग्रहणं, वस्तुतोऽयं कालः सर्वेषां कृते चमत्कृतः स्यात् । तथापि गणकानां कृते अयं कालः अतीव महत्वपूर्ण: । यतोहि खगोलज्ञानां गोलज्ञानां प्राक्कृतश्रमस्य (सम्पूर्णपञ्चांग-साधनस्य नूतनाविष्कारादिकस्य च प्रेक्षणावसरः अयं कालः । तत्रादौ किन्नाम ग्रहणं ? इति जिज्ञासायां प्रथमं ग्रहः किं ? इति ज्ञेय । गृह्णातीति ग्रहः इति। प्रत्येकस्मिन् ग्रहे यत् किञ्चिदपि ग्रहणस्य सामर्थ्य भवत्यैव। अस्मात् स: पदार्थः ग्रह इत्युच्यते। यथोक्तम्- चन्द्रादिग्रहे स्वगतप्रकाशाभावाद्रविकिरण-संयोगवशादेव प्रकाशवान्। ग्रहणे ग्राह्यग्राहकयोः भूमिका बहुला दृश्यते। सामान्येन ग्रह् धातोः करणे ल्युटि सति "गृह्यतेऽनेनेति ग्रहणम्" इत्यर्थोपलभ्यते। अर्थात् ग्राहको यदा ग्राह्यं वस्तु गृह्णाति तदा ग्रहणम् । अथवा ग्राह्यग्राहकयोः पूर्वापरयाम्योत्तराभावत्वं ग्रहणत्वम्। यतो हि नभसि ग्रहाणामन्तरं त्रिविधं भवितुमर्हन्ति। यत् पूर्वापरयाम्योत्तरावधिरूपगतिभेदत्रयं इति । तत्र केवलं चन्द्रगहणे ग्राह्य-ग्राहकयोः ऊर्ध्वाधरान्तरं न स्यात्। यतोहि अत्र ग्राह्यग्राहकयोः संयोगः चन्द्रकक्षायामेव भवति। नास्त्यत्र कक्षा भेद: । तत्र पूर्वापरान्तरं नाम ग्राह्य-ग्राहकयोः राश्यंशकलानामन्तरं भोगांशानामन्तरं वा पूर्वापरान्तरं तस्याभावः पूर्वापरान्तराभावः। एवमेव याम्योत्तरान्तरं नाम ग्राह्यग्राहकयोः स्वस्थानात् (भवृत्तस्थात्स्फुटग्रहबिम्बस्य दक्षिणोत्तरान्तरं भवति तदेव कदम्बप्रोतवृत्ते शर: उच्यते। तस्याभावः याम्योत्तरान्तराभावः अर्थात् ग्रहाः शरान्तरे भ्रमन्तीति। तथा च ग्रहकक्षा क्रमः अधोऽधः क्रमेण शनि-कुज-रवि-शुक्र-बुध-चन्द्राः न जातु सम्भावि। अत: उर्ध्वाधरन्तराभावो मा मनन्ति तेन अपास्ताः । एतदुक्तं भवति।

जगतीदं द्विप्रकारकं ग्रहणम्। चन्द्रग्रहणम् सूर्यग्रहणञ्च । परन्तु एवं न मन्येरन् इमे एव ग्रहणे इति । यतोहि - शुक्रपारगमनम् बुधपारगमनम् ग्रहणादिशानि नैकानि ग्रहणानि भवन्ति। तथापि सूर्याचन्द्रमसोः ग्रहणं बहूपयोगीह भूवासीनां कृते अस्ति। यथोक्तम्-

**बहुफलं जपदानहुतादिके स्मृतिपुराणविदः प्रवदन्ति हि ।**[१]

**सदुपयोगि जने स चमत्कृति ग्रहणमिन्द्विनयोः कथयाम्यतः ।।**

**चन्द्रग्रहणम्-** चन्द्रस्य ग्रहणं चन्द्रग्रहणम्। चन्द्रग्रहणे ग्राह्यश्चन्द्रः ग्राहिकाश्च भूभा ये राहुसंज्ञया अपि प्रसिद्धा। कदा ग्रहणं संभवति इति शंकायां **स्फुटतिथ्यवसाने तु मध्यग्रहणमादिशेत्**[२] अर्थात् स्पष्टपर्वान्ते ग्रहणस्य मध्यकालः भवति । **कार्यं हि चन्द्रग्रहणं निशायाम्**[३] इति कमलाकरोक्त्या चन्द्रग्रहणं तु पूर्णिमान्ते सिद्ध्यतीत्यत्र नास्ति सशयः। यतोहि महीच्छाया सूर्यतः षड्भान्तरे भ्रमति। अतः सूर्यचन्द्रयोरन्तरं पूर्णिमायां षड्भान्तरतुल्यं भवितुमर्हति। यथोक्तम्- **"भानोर्भार्धे महीच्छाया तत्तुल्येऽर्कसमेऽपि वा"**।[४] भास्कराचार्येण ग्रहणस्य संभावनावसरे उक्तं यत् - चन्द्रग्रहणे यदा विराहुसूर्ययो: भुजांशाः मनूनकाः अर्थात् चतुर्दशोना स्यात् तदा चन्द्रग्रहणं संभाव्यते। अथ को नाम भूभा? इति जिज्ञासा। रविकिरणाभिमुखं गतस्य भूबिम्बस्य विरुद्धदिशि तमोमयी या छाया सा भूभा। तत्र प्रकाशकस्य सूर्यबिम्बस्य भूबिम्बान्महत्वात् सा भूभा वृत्ताधारसूचीरूपा भवति। अर्थात् वर्तुलाकारयोः रविभूबिम्बयोः समन्तात् कृतानां क्रमस्पर्शरेखाणां योगेन भुवो विरुद्धदिशि तमोमयी वृत्ताधारा दीर्घा सूची उत्पद्यते सैव भूभा । सा दीर्घतया चन्द्रकक्षामप्यतिक्रम्य बहिर्याति। तथाऽऽह भास्करः-

---

१ . सि. शि.चन्द्रग्रहण.श्लो.१

२ सूर्यसिद्धान्त. चन्द्रग्रहण.श्लो.१६

३. सिद्धान्ततत्त्वविवेक. श्लो.६

४ सूर्यसिद्धान्त. चन्द्रग्रहण.श्लो.६

**भानोर्बिम्बपृथुत्वादपृथुपृथिव्याः प्रभाहि सूच्यग्रा ।**
**दीर्घतया शशिकक्षामतीत्य दूरं बहिर्याता ।।[१] सि. शि. गोला. ग्रहणवासना. श्लो. सं. ५**

ततः चन्द्रः स्वगत्या स्वकक्षायां पूर्वाभिमुखो गच्छन् भूभायां प्रविशति । तदा सा भूभा चन्द्रस्य आच्छादिका भवति। उभयोः ग्रहणयोः पञ्चावयवाः सन्ति। यथा स्पर्श- सम्मीलन- मध्यग्रहण-उन्मीलन-मोक्षश्चेति। यदा भूभां चन्द्रः स्पृशति तदा चन्द्रग्रहणस्य स्पर्शकालः। चन्द्रस्य पूर्वपालिः भुभायाः केन्द्रबिन्दुना सह स्पर्शं करोति तदा सम्मिलनकालः । यदा पुनः चन्द्रस्य केंद्रबिन्दुः भूभायाः केन्द्रबिन्दुना सह संयोगं करोति तदा मध्यचन्द्रग्रहणम्। यदा च भूच्छायया चन्द्रः अर्धमुक्तः भवति तदा उन्मीलनकालः। तथा च यदा चन्द्रः सम्पूर्णमुक्तः तदा मोक्षकालः। चन्द्रः एकस्यां होरायां दन्तकलारसबाणविकलया (३२५६) कोणीयान्तर-मुल्लंघयति। अतः भूभायां उल्लंघनं कर्तुं सः प्रायः होरात्रयं स्वीकरोति। भूभायां पूर्णग्रहणे पूर्णग्रहणस्थितिकालः ७/४ होरा इति। यदि चन्द्रः स्वकक्षायां परिभ्रमन् भूभासूच्यां पूर्णतया प्रविशति तर्हि पूर्णचन्द्रग्रहणं कथ्यते । यदि सः केवल-मांशिकरूपेण प्रविशति तर्हि खण्डचन्द्रग्रहणमुच्यते। भूभादैर्घ्यं ८६८८०० क्रोशानि। भुवः चन्द्रस्यान्तारं २४०००० क्रोशानि । अतैव असम्भवमिदं यत् चन्द्रकक्षा भूभायाः बहिर्भवेत्। ग्रहणे ग्रासमानसाधनं बहु आवश्यकं भवति। यतोहि अनेन बिना स्पर्शखण्डपूर्णग्रहणानां ज्ञानं न भवति। इदानीं ग्रासानयने भास्करोक्तिः-

---
१ सि.शि.गोला.ग्रहणवासना.श्लो.सं.५

**भानोर्गतिः शरहता रविभिर्विभक्ता चन्द्रस्यलोचनगुणा तिथि भाजिता च ।।**
**लब्धान्तरं भवति वावनिभाप्रमाणं भूभा विधुं विधुरिनं ग्रहणे पिधत्ते।।**[१]

अर्थात् पञ्चगुणितरविगति: द्वादशभिः विभाज्य लब्धं फलं पृथक् संस्थाप्यम्। तत्र द्विगुणितचन्द्रगतौ पञ्चदशभिः विभाज्य लब्धं फलमन्यत्र स्थाप्यम्। उभयोः लब्धफलयोरन्तरमेव चन्द्रकक्षायां भूभाबिम्बस्य मानम्। तथा च स्पर्शात् मोक्षकालं यावत् खण्डः स्थितिसंज्ञकः। तस्यार्धं स्थित्यर्थम् । तच्च द्विविधं- स्पर्शकालात् मध्यग्रहणं यावत् स्पार्शिकस्थित्यर्थं तथा मध्यग्रहणात् मोक्षं यावत् मौक्षिकस्थित्यर्धम्। एवमेव सम्मिलनात् उन्मिलनान्तं यावत् खण्डः विमर्दसंज्ञकः तथा तस्यार्धं विमर्दार्धम । तच्च द्विविधं सम्मिलनात् मध्यग्रहणं यावत् स्पार्शिकविमर्दार्धं तथा मध्यग्रहणात् उन्मिलनान्तं यावत् मौक्षिकविमर्दार्धमिति।

सूर्यग्रहणे छादकः चन्द्रः छाद्यश्च सूर्यः। तथा हि मेघाच्छन्नरविः क्वचिच्छन्नः क्वचिद् दृश्यश्च तथैव भिन्नकक्षास्थाने इन्दुनाच्छादित: सूर्यः क्वचिदाच्छादितः क्वचिद् दृश्यैव भवति। सूर्यग्रहणं सार्वभौमिकं न भवति। सूर्यपृथिव्ययोर्भागे यदा चन्द्र: आगच्छति तदा चन्द्रस्य छाया पृथिव्यां पतति। तदुक्तम सूर्यसिद्धांते- **छादको भास्करस्येन्दुरधःस्थो घनवद् भवेत्**[२]। सूर्यग्रहणे चास्ति किञ्चिद् वैशिष्ट्यम्। तच्चात्र सर्वं चन्द्रग्रहणदृष्ट्या ग्रासादिमान साधनमावश्यमेव कर्तव्यम् । भूगर्भीय-भूपृष्ठीयग्रहयोः क्रान्तिवृत्ते यावा-न्लम्बितो भागः तदेव लम्बनम्। अस्य संस्कारः अमान्ते कृते सति स्फुट-अमान्तकाल: आयाति। तदनन्तरम् नतिसाधनम् कर्तव्यम्। यतोहि चन्द्रस्य स्वविमण्डले गतत्वात्सूर्यचन्द्रकेन्द्रान्तरं चन्द्रशरतुल्यम् । परन्तु पृष्ठीयामान्ते लम्बितचन्द्रस्य क्रान्तिवृतेन सह यदन्तरम् स: चन्द्रमसः स्पष्टशरः सैव

---

१ सि. शि.चन्द्रग्रहण.श्लो.९

२ सूर्यसिद्धान्त. चन्द्रग्रहण.श्लो.९

नतीत्युच्यते। अर्थात् ग्राह्यग्राहकयोः शरान्तरम् नतिरिति । सूर्यग्रहणं त्रिधा भवति ।

यदि सूर्यचन्द्रमसः लग्नरेखातः भूपृष्ठीय सूर्यलग्नरेखा पर्याप्ता भिन्ना, तर्हि सूर्यग्रहणं न भवति। एकस्मिन् ग्रहणचक्रे अष्टादशाधिक अष्टादशदिनानि भवन्ति। तदानीं एकस्मिन् ग्रहणचक्रे एकचत्वारिंशत् सूर्यग्रहणानि, एकोनत्रिंशत् चन्द्रग्रहणानि च भवन्ति । एकस्मिन् वर्षे द्वे सूर्यग्रहणे अवश्यं भवतः । ग्रहणानामधिकतमा सप्तसंख्या: भवन्ति। पञ्चसूर्यग्रहणानि, द्वे चन्द्रग्रहणे अथवा चत्वारि सूर्यग्रहणानि त्रिणि चन्द्रग्रहणानि च भवितुमर्हन्ति।

।। इति शम्।।

**सन्दर्भग्रंथसूची-**

१- सूर्यसिद्धान्तस्य तत्त्वामृतभाष्यम्

२- सूर्यसिद्धान्तस्य तत्त्वामृतभाष्यम्

३- सूर्यसिद्धान्तस्य भूगोलाध्यायः-१३

४- सिद्धांतशिरोमणिः चन्द्रग्रहणाधिकारः-।।।।

५- सूर्यसिद्धान्तस्य चन्दग्रहणाधिकारः ।।6।

६-सिद्धांततत्वविवेकः चन्द्रग्रहणाधिकारः ।।

७- सूर्यसिद्धान्तस्य चन्द्रग्रहणाधिकारः।6।।

८- सिद्धांतशिरोमणिः ग्रहणवासना ।।

९- सिद्धांतशिरोमणिः चन्द्रग्रहणाधिकारः।१।।

१०- सूर्यसिद्धान्तस्य चन्द्रग्रहणाधिकारः।१।।

११- अन्तर्जालं साभार (विकिपिडिया)

# फलप्रदाने भावानां शुभाशुभत्वम्

**डा. अरुणकुमारः**
सहायकाचार्यः (अं.का.) ज्योतिषविभागः
रा. सं. सं. एकलव्य परिसरः

**प्रत्यक्षं ज्योतिषं शास्त्रम्** इत्युक्त्या ज्योतिषशास्त्रस्य प्रत्यक्षत्वं सर्वविदितम् । इदं हि शास्त्रं वेदपुरुषस्य निर्मलचक्षुषाङ्गेनाख्यातमाचार्यैः । **चक्षुषाङ्गेन हीनो न किञ्चित्करः** इति आचार्यभास्करेण प्रतिपादितसिद्धान्तनुसारं यथा चक्षुषा विना जनः न किञ्चित्करः तद्वदेव ज्योतिषशास्त्रमन्तरा कालरहस्यं नावगन्तुं क्षमः ।

कालानुगुणं शुभाशुभफलविवेचनं ज्योतिषशास्त्रस्य मुख्यं प्रयोजनम् । तत्र पूर्वजन्मनि कृतानां कर्मणां शुभाशुभपलबोधकं शास्त्रं ज्योतिषशास्त्रमिति आचार्यवराहमिहिरेण स्वलघुजातकाख्यस्य ग्रन्थस्य प्रयोजननिरूपणप्रसङ्गे आदौ एव प्रतिपादितं यत्[१]

**यदुपचितमन्यजन्मनि शुभाशुभं तस्तय कर्मणः पक्तिम् ।**
**व्यञ्जयति शास्त्रमेतत् तमसि द्र्याणि दीप इव ।।**

अर्थात् यथा तमसि विद्यमानानि वस्तुनि दीपकस्य प्रकाशेन दृग्गोचराणि भवन्ति तथैव पूर्वजन्मनि कृतानि कार्याणि शास्त्रमेतत् सूर्यादिग्रहाणां शुभाशुभस्थितिवशात् प्रकटीकरोति । अतः पूर्वजन्मस्थितिवशादेव सुखं दुःखं, दारिद्र्यमैश्वर्यं, सन्ततिप्राप्ति-रनपत्यता च जायते । अतः मानवजीवने कर्मणः एव प्रामुख्यं विद्यते[२] । यतोहि मनुष्यः यत्किमपि शुभाशुभं कर्म करोति तस्य शुभाशुभं फलमपि सः अवश्यमेव लभते । यथा -

---

[१] लघुजातकम्

[२] अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् । नाभुक्तं क्षीयते कर्म कल्पकटिशतैरपि ।।

**यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् । तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ।।**

तस्यैव शुभाशुभफलस्य प्रतिपादनम्, अशुभफलस्य निराकरणञ्च एतद्धोराशास्त्रं शुक्षयति । ज्योतिषशास्त्रेऽपि पूर्वजन्मनि कृतशुभाशुभकर्मणां तदनुगुणं फलं तन्वादिद्वादशभावैः संसूच्यते । तत्र ज्योतिषशास्त्रे तन्वादयो द्वादशभावाः प्रसिद्धाः यथा[1]-

**तनुर्धनं ततो भ्राता च सुहृत्पुत्रो रिपुर्वधुः ।**
**मृत्युश्च धर्मकर्मायौ व्ययो भावाः प्रकीर्तिताः ।।**

एवं प्रकारेण तन्वादिद्वादशभावेषु यस्य कस्यापि भावस्य विचारः क्रियते तद्भावविशेषः लग्नवत् प्रकल्प्य ततः द्वादशभावेषु ग्रहाणां स्थितिं बलाबलं च विलोक्य फलं वक्तव्यम् । यथा आचार्यः मन्त्रेश्वरः[2] -

**भावस्य यस्यैव फलं विचिन्त्यं भावं च तं लग्नमिति प्रकल्प्य ।**
**तस्माद् वदेद्द्वादशभावजानि फलानि तद्रूपधनादिकानि ।।**

उपर्युक्तानुसारं ग्रहभावस्पष्टता तेषां बलं च ज्ञातव्यं ततो भावसामान्यफलान्तरं शुभपापमित्रग्रह-दृष्टियोगादिकं भावषड्वर्गाः भावेशस्योदयास्तादिकं ज्ञातव्यम् । तत्र तन्वादिद्वादशभावानां सामान्येन शुभाशुभफलप्रदानस्य सिद्धान्तं प्रायः सर्वैरेवाचार्यः स्वीकृतं यत् -

अधुना तन्वादीनां द्वादशभावानां शुभाशुभज्ञानमाह -

**यो यो भावः स्वामिदृष्टो युतो वा सौम्यैर्वा स्यात्तस्य तस्यास्ति वृद्धिः ।**
**पापैरेवं तस्य भावस्य हानिर्निर्दिष्टव्या पृच्छतां जन्मतो वा।।**[3]

अर्थात् जातकस्य जन्मकालतः प्रश्नकालतो वा तन्वादिद्वादशभावेषु यो यो भावः स्व स्वामिना-युतः दृष्टः अथवा सौम्यग्रहाणां बुधगुरुशुक्र-

---

[1] ज्योतिषतत्त्वप्रकाशः , चतुर्थोऽध्यायः श्लोक-1

[2] फलदीपिका, अ-15, श्लो. - 20

[3] षट्पञ्चाशिका, अ.-1, श्लो.-3

पूर्णचन्द्राणामन्यतमेन वा युतः दृष्टः वा भवेत् तस्य भावस्य वृद्धिर्वक्तव्या । तत्सम्बन्धिभावस्य शुभफलं प्राप्यते इत्यर्थः । एवं प्रकारेण पापग्रहैः यो यो भावः युक्तो दृष्टो वा भवेत् तस्य भावस्य हानिः अपचयः वक्तव्यः । भावानां शुभाशुभफलप्रदानस्य सामान्योऽयं नियमः । भावानां बलाबलविषये उक्तं फलदीपिकायाम् आचार्यमन्त्रेश्वरेणापि यथा -

**भावाः सर्वे शुभपतियुता वीक्षिता वा शुभेशैः**
**तत्तद्भावाः सकलफलदाः पापदृग्योगहीनाः ।**
**पापा सर्वे भवनपतयश्चेदिहाहुस्तथैव**
**खेटैः सर्वैः शुभफलमिदं नीचमूढारिहीनैः ।।**[१]

पापाग्रहाणां युति अथवा दृष्टिरहिता तन्वादयो भावाः स्वस्वामिना शुभग्रहेण वा युता अथवा दृष्टाः शुभफलदाः भवन्ति । भावस्वामी पापग्रहोऽपि यदि स्वभावं पश्येत्, युक्तः वा भवेत् अन्ये पापग्रहाः न पश्ययेयुस्तदा सोऽपि शुभफलदायकः भवति । एवं प्रकारेण भावाधिपतिः ग्रहः यदि स्वनीचराशौ स्थितः, शत्रुराशौ स्थितः, अथवा सूर्यसान्निध्येन अस्तङ्गतः न भवेत् तदा सः भावस्य वृद्धिं करोति । अपि च जातकपारिजाते[२] -

**ये ये भावाः सितज्ञामरगुरुपतिभिः संयुता वीक्षिता वा ।**
**नान्यैर्दृष्टा न युक्ता यदि शुभफलदा मूर्तिभावादिकेषु ।।**

इति तन्वादिभावानां सामान्येन शुभाशुभफलप्रदानस्य क्रमः विद्यते । इदानीं भावानां शुभाशुभविचारे विशेषेण उच्यते ।

**तत्तद्भावात् त्रिकोणे स्वसुखमदनभे चास्पदे सौम्ययुक्ते,**

---

[१] फलदीपिका, अ-15, श्लो. - 1

[२] जातकपारिजातः

**पापानां दृष्टिहीने भवनपसहिते पापखेटैरयुक्ते ।**
**भावानां पुष्टिमाहुः सकलशुभकरीमन्यथा चेत्प्रणाशं,**
**मिश्रं मिश्रैर्ग्रहेन्द्रैः सकलमपि तथा मूर्तिभावादिकानाम् ।।**[१]

अर्थात् कस्मादपि भावाद्यदि द्वितीयभावे, त्रिकोणे (5,9), तथा केन्द्रे (1,4,7,10) शुभग्रहाः भवेयुः, भावाधिपतिश्च पापग्रहैर्युक्तः दृष्टः वा न भवेत् तदा सः भावः बलवान् भवति तथा तस्य वृद्धिः भवति । एतद्विपरीतं यदि उपर्युक्तेषु भावेषु पापग्रहाः भवेयुः अथवा भावाधिपतिः पापग्रहैः युक्तः दृष्टः वा भवेत् तदा सः भावः निर्बलः अशुभफलदायकश्च भवति । उपर्युक्तेषु भावेषु यदि शुभाः पापाश्च (मिश्रिताः) ग्रहाः भवेयुः तथा भावाधिपतिः मिश्रितैर्ग्रहैः (शुभाशुभग्रहैः) युक्तः दृष्टश्च भवति तदा तस्य ग्रहस्य मिश्रितं फलं भवति ।

**नाशस्थानगतो दिवाकरकरैलुप्तस्तु यद्भावपो,**
**नीचाराति गृहं गतो यदि भवेत्सौम्यैरयुक्तेक्षितः ।**
**तद्भावस्य विनाशनं वितनुते तादृग्विधोऽन्योस्ति चेत्,**
**तद्भावोऽपि फलप्रदो न हि शुभश्चेन्नाशमुग्रग्रहः ।।**

यस्य भावस्याधिपतिः नाशस्थाने अर्थात् तात्कालिकजन्मलग्नादष्टमे भावे स्थितः, सूर्यसान्निध्येन अस्तङ्गतः, शत्रुराशौ, नीचराशौ वा स्थितः, शुभग्रहैरदृष्टः तद्भावस्य फलनाशकरः कथितः । एतादृशः उपर्युक्तलक्षणैर्युतः ग्रहः यस्मिन् भावे स्थितः भवेत् तस्य भावस्य फलमपि नाशयति । उपर्युक्तलक्षणैर्युतः यदि कश्चन

[१] फलदीपिका, अ-1, श्लो. - 1

शुभग्रहो भवेत् तदा तस्य शुभग्रहाधिष्ठितभावस्य फलं (शुभफलं) अपि सः जातकः न प्राप्नोति । तत्र विषयेऽस्मिन् आचार्यगर्गोऽपि यथा[1] –

**नीचस्थो रिपुगेहस्थो ग्रहो भावविनाशकृत् ।**
**उदासीनो ग्रहो मध्यो मित्रस्वर्क्ष त्रिकोणगः ।**
**स्वोच्चस्थश्च ग्रहोऽप्येवं भाववृद्धिकरः स्मृतः ।**
**व्ययाष्टमषष्ठभावेषु वैपरीत्यफलमाह उशनाचार्यः ।**
**सौम्याः पुष्टिं पापा विपर्ययं संश्रिताग्रहाः कुर्युः ।**
**मूर्त्यादिषु निधनान्त्य रिपुभावे व्युत्क्रमात्फलदाः ।।**

अपि च-

**लग्नादिभावाद्रिपुरन्ध्ररिष्फे पापग्रहास्तद्भवनादिनाशम् ।**
**सौम्यास्तु नात्यन्तफलप्रदाः स्युर्भावादिकानां फलमेवमाहुः ।।**
**यद्भावनाथो रिपुरन्ध्ररिष्फे दुःस्थानपो यद्भवनस्थितो वा ।**
**तद्भावनाशं कथयन्ति तज्ज्ञाः शुभेक्षितस्तद्भवनस्य सौख्यम् ।।**
**तत्तद्भावत्रिकोणे स्वसुखमदनभे चास्पदे सौम्ययुक्ते**
**पापानां दृष्टिहीने भवनपसहिते पापखेटैरयुक्ते ।**
**भावानां पुष्टिमाहुस्त्वथ च शुभकरीमन्यभात्वे प्रणाशम्**
**मिश्रं मिश्रग्रहैन्द्रैः सकलमपि तथा मूर्तिभावादिकानाम् ।।इति।।**

जन्माङ्गचक्रे लग्नादिविचारणीयभावेभ्यः षष्ठेऽष्टमे द्वादशे च भावे पापग्रहाणां स्थितिः तद्भावसम्बन्धिफलस्य नाशकः भवति । उक्तस्थानेषु शुभग्रहाणां स्थितिः अत्यन्तफलदा न भवति । भावस्य पूर्णफलं न लभ्यते इत्यर्थः ।

---

[1] बृहज्जातके भट्टो.२०।१०

यस्य कस्यापि भावस्याधिपतिः षष्ठेऽष्टमे अथवा द्वादशे स्थितः भवेदथवा एतेषां भावानाम् अधिपतयः यद्भावे स्थिताः भवन्ति तद्भावस्य फलं नाशयन्ति । यदि तेषु भावेषु शुभग्रहाणां दृष्टिर्भवति तदा तेषां भावानां सामान्यफलं लभ्यते ।

**भावाधीशे च भावे सति बलरहिते च ग्रहे कारकाख्ये**
**पापान्तःस्थे च पापैररिभिरपि समेतेक्षिते नान्यखेटैः ।**
**पापैस्तद्-बन्धुमृत्युव्ययभवनगतैस्तत्त्रिकोणस्थितैर्वा**
**वाच्या तद्भावहानिः श्फुटमिह भवति द्वित्रिसंवादभावात् ।।**

यदि जन्माङ्गचक्रे विचारणीयभावः, भावाधीशः, भावकारकग्रहश्चेति निर्बलाः भवेयुः, पापग्रहयोर्मध्ये स्थिताः भवेयुः, पापग्रहैः शत्रुग्रहैः वा युक्ता दृष्टाः वा भवेयुः, अन्यैः (शुभग्रहैः मित्रग्रहैः वा) युताः दृष्टाः वा न भवेयुः अथवा विचारणीयभावात् चतुर्थे, अष्टमे, द्वादशे भावे अथवा त्रिकोणे (5,9) पापग्रहाः स्थिताः भवेयुस्तदा विचारणीयभावस्य फलं नश्यति । उपर्युक्तलक्षणेषु द्वे त्रीणि वा लक्षणानि जन्माङ्गचक्रे भवन्ति तदा भावस्य सम्पूर्णं फलं नश्यति ।

**भावस्योदयपाश्रितस्य कुशलं यद्भावपेनोदय-**
**सेवामी तिष्ठति संयुतोऽपि कलयेत्तद्भावजातं फलम् ।**
**दुःस्थाने विपरीतमेतदुदितं भावेश्वरे दुर्बले**
**दोषोऽतीव भवेद् बलेन सहिते दोषाल्पता जल्पिता ।।9।।**

यस्मिन् भावे लग्नस्याधिपतिः स्थितः भवेत्तस्य भावफलस्य वृद्धिं करोति । लग्नेन सम्बद्धाः (युताः दृष्टाः वा) ग्रहाः येषां भावानामधिपतयः भवन्ति तेषां भावानां फलस्याभिवृद्धिः लग्नेशेन क्रियते । अर्थात् लग्नेशस्य बलानुसारं तेषां भावानां फलं प्राप्यते ।

यदि भावाधिपतिः दुःस्थानेषु (त्रिकादिषु) स्थितः भवेत्तदा तस्य भावफलं ह्रासतामेति । भावेशः निर्बलः भवेत्तदा अधिका हानिः, बलयुक्तः भवेच्चेत् भावफलस्य अल्पहानिं कुरुते ।

**यद्भावेष्वशुभोऽपि वोदयपतिस्तद्भाववृद्धिं दिशेत्**
**दुःस्थानाधिपतिः स चेद्यदि तनोः प्राबल्यमन्यस्य न ।**
**अत्रोदाहरणं कुजे सुतगते सिंहे झषे वा स्थिते**
**पुत्राप्तिं शुभवीक्षिते झटिति तत् प्राप्तिं वदन्त्युत्तमा ।।**

लग्नस्याधिपतिः अशुभग्रहोऽपि किमर्थं न भवेत् सः यस्मिन् कस्मिन् अपि भावे स्थितः भवेत्तस्य भावस्य वृद्धिकारकः भवति । लग्नेशः यदि अशुभभावानाम् (त्रिकभावानां) अधिपतिरपि भवेत्तदापि सः लग्नेशस्य एव शुभफलं ददाति, न तु अशुभभावानाम् ।

उदाहरणार्थं मीनराशेः सिंहराशेर्वा मंगलः लग्नेशः सन् पञ्चमभावे स्थितः भवेत्तदापि (यतः मंगलः षष्ठेशः अथवा अष्टमेशः वर्तते तथापि ) पञ्चमभावस्य हानिं न कुरुते । वृद्धिम् एव करोतीत्यर्थः । यदि मंगलस्योपरि शुभग्रहाणां दृष्टिर्भवेत्तदा जातकः शीघ्रमेव सन्ततिसुखं प्राप्नोति । अन्ते च सारांशरूपेण यथा -

**सौम्यवर्गाश्रिता भावा: शुभतां प्राप्नुवन्ति हि ।**
**पापवर्गाधिका नेष्टास्तन्वाद्या नात्र संशय: ।।**
**लग्नलग्नाधिपौ स्यातां बलाधिकतरौ यदि ।**
**तत्फलानां प्रवृद्धि: स्याद्धीनो हानिकर: स्मृत: ।।**
**एवं भावेषु सर्वेषु भावभावेशयोर्बलात् ।**
**ततो जनुषि वक्तव्या हानिवृद्धिश्च कोविदै: ।। इति ।।**

**पापग्रहाणां स्थितिविषये विशेषः[१] -**

**पापग्रहाः षष्ठमृतिव्ययस्थास्तद्भाववृद्धिं कलयन्ति दोषैः ।**
**शुभास्तु तद्भावलयं हि तस्माच्छत्र्वादि भावात्फलप्रणाशः ।।**

त्रिक् भावेषु षष्ठाष्टमद्वादशेषु स्थिताः पापग्रहाः एतेषां (त्रिक् भावानां) पापफलं विनश्य शुभफलं प्रयच्छन्ति । एतेषु भावेषु (उक्त-अशुभभावेषु) शुभग्रहाणां स्थितिः एतेषां भावानां शुभफलं विनश्य पापफलं प्रयच्छन्ति ।

**सन्धिगतग्रहफलम्-**

तन्वादिद्वादशभावानां फलविचारे भावसमे खेटे पूर्णं फलं, सन्ध्यंशादितुल्ये ग्रहे तु शून्यं फलं भवति । सन्धिद्वयमध्यस्थिते ग्रहे तद्भावजं फलं भवेत् । द्विसन्धिभ्यां हीनेऽधिके क्रमेण पूर्वापरे भावे फलं भवेत् ।

**खेटे भावसमे पूर्णं फलं सन्धिसमे तु खम् ।।**
**खेटे सन्धिद्वयान्तःस्थे फलं तद्भावजं भवेत् ।**
**हीनेऽधिके द्विसन्धिभ्यां भावे पूर्वाऽपरे फलम् ।।**

यथा भावफलानयनेऽपि उक्तमपि आचार्यैः --

**भावप्रवृत्तौ हि फलप्रवृत्तिः पूर्णं फलं भावसमांशकेषु ।**
**ह्रासः क्रमाद्भावविरामकाले फलस्य नाशः कथितो मुनीन्द्रैः ।।**

इति प्राचीनाचार्याणां वचनप्रामाण्यात् आरम्भसन्ध्यग्रतो भावप्रवृत्तिर्भवति, तत एव फलस्यापि प्रवृत्तिर्जायते। ततः क्रमेण फलस्य वृद्धिर्भवति । भावतुल्ये ग्रहे फलं रूपमितं जायते । तत्र सन्धिग्रहान्तरमपि परमं भवति, अर्थात् भावसन्ध्यन्तर-तुल्यं सन्धिग्रहान्तरं जायते। ततः क्रमेण फलस्य ह्रासो जायते । तत्र विरामसन्धि-तुल्ये ग्रहे फलस्य नाशस्तत्र सन्धिग्रहान्तरमपि शून्यसमं भवत्यतस्तत्र

---

[१] फलदीपिका, अ-15, श्लो. - 19

सन्धिखगान्तरवशेनैव फलस्य वृद्धिह्रासौ सिद्धौ । अतो अनुपातवशेनेष्टस्थाने भावफलं जायते । तत्रानुपातो यथा-यदि भावसन्ध्यन्तरतुल्यसन्धिग्रहान्तरेण परमं फलं रूप (१) मितं लभ्यते तदेष्टसन्धिग्रहान्तरेण किमितीष्टस्थाने भावफलम् । अतः भावसन्धिगतः ग्रहः शून्यफलं, भावततुल्यः ग्रहः पूर्णं (रूपमितं) च फलं प्रयच्छति । यथोक्तमपि सन्धिगतग्रहफलम् आचार्यमन्त्रेश्वरेणापि[१] -

**स्वोच्चे सुहृत्क्षेत्रगतो ग्रहेन्द्रः षड्भिर्बलैर्मुख्यबलान्वितोऽपि ।**
**सन्धौ स्थितः सन्नफलप्रदः स्यात् एवं विचिन्त्यात्र वदेद्विपाके ।।**

स्थान-काल-दिगादि-षड्बलैर्युतो ग्रहः स्वोच्चराशौ, स्वमित्रराशौ अथवा स्वराशौ स्थितोऽपि ग्रहः यदि भावसन्धिगतः स्यात्तदा शुभफलं न प्रयच्छति । अतः दशाविचारात्पूर्वम् एतद् अवश्यमेव विचार्यम्। अपि च भावतुल्य ग्रहविषये आचार्यमन्त्रेश्वरः[२] -

**भावेषु भावस्फुटतुल्यभागस्तद्भावजं पूर्णफलं विधत्ते ।**
**सन्धौ फलं नास्ति तदन्तराले चिन्त्योऽनुपातः खलु खेचराणाम् ।।**

यस्मिन् कस्मिन्नपि भावे भावस्पष्टतुल्यः स्पष्टग्रहः तस्य भावस्य पूर्णं फलं प्रयच्छति । भावसन्धौ गताः ग्रहाः निष्फलाः भवन्ति । सन्धि-भावयोरन्तराले अनुपातात् ग्रहबलविचारः कर्तव्यः । उक्तमपि यथा-

**लग्नाद्भावफलं यद् यद् ग्रहयोगात् प्रकीर्तितम् ।**
**तत् तत् शुभाशुभं सर्वं भावचक्राद् विचिन्तयेत् ।।**
**खेटे भावसमे पूर्णं शून्यं सन्धिसमे स्मृतम् ।**
**फलं तद्भावखेटोत्थं ज्ञेयं मध्येऽनुपाततः ।।**

---

[१] फलदीपिका, अ-15, श्लो. - 13

[२] फलदीपिका, अ-15, श्लो. - 14

**सन्दर्भग्रन्थसूची :-**


१ लघुजातकम्

२ अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ।
नाभुक्तं क्षीयते कर्म कल्पकटिशतैरपि ।।

३ ज्योतिषतत्त्वप्रकाशः , चतुर्थोऽध्यायः श्लोक-१

४ फलदीपिका, अ-१५, श्लो. - २०

५ षट्पञ्चाशिका, अ.-१, श्लो.-३

६ फलदीपिका, अ-१५, श्लो.- १

७ जातकपारिजातः

८ फलदीपिका, अ-१, श्लो. १

९ बृहज्जातके भट्टो.२०।१०

१० फलदीपिका, अ-१५, श्लो.- १९

११ फलदीपिका, अ-१५, श्लो.- १३

१२ फलदीपिका, अ-१५, श्लो.- १४


**यात्रायां प्रस्थानकर्तुः नियमाः-**

**दुग्धं त्याज्यं पूर्वमेव त्रिरात्रं क्षौरं त्याज्यं पञ्चरात्रञ्च पूर्वम्।**
**क्षौद्रं (मधु) तैलं वासरेस्मिन् वमिश्च त्याज्यं यत्नाद् भूमिपालेन नूनम्।।**
**भुक्त्वा गच्छति यदि चेत्तैलगुडक्षारपक्वमांसानि।**
**विनिवर्तते स रुग्नः स्त्रीद्विजमवमान्यः गच्छतो मरणम्।।**

**मुहूर्तचिन्तामणिः-**11/96-97

# इन्द्वोर्कग्रहणमीमांसा

**विभामिश्रा**
शास्त्री (सिद्धान्तज्योतिष)
रा.सं.सं. लखनऊ परिसर

**सर्वज्ञानमयो हि स:**[१] इति मनुस्मृतिवचनानुसारं सर्वेषां ज्ञानरत्नानां भण्डार: भारतीयसंस्कृतेराधारस्तम्भश्च वेदा: । वेदानां षडङ्गानि [२] सुविदितानि एव। तेषु षडङ्गेषु ज्योतिषशास्त्रस्य महत्त्वं प्राधान्यञ्च अन्यतमम् । तद्यथा-

**वेदा हि यज्ञार्थमभिप्रवृता कालानुपूर्वा विहिताश्च यज्ञा: ।**
**तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञान् ।।**[३]

एवमेव- **तस्माद्द्विजैरध्ययनीयमेतत् पुण्यं रहस्यं परमं च तत्त्वम् ।**
**यो ज्योतिषं वेत्ति नर: स सम्यक् धर्मार्थकामाँल्लभते यशश्च ।।**[४]

एवं भूतस्य ज्ञानस्य के अधिकारिण: भवितुर्महन्ति इति जिज्ञासाया: समाधानं सूर्यसिद्धान्ते स्वयं भगवता सूर्यांशपुरुषेण निगदितम् । तद्यथा-

**रहस्यमेतद्देवानां न देयं यस्य कस्यचित् । सुपरिक्षित शिष्याय देयं वत्सरवासिने ।।**[५]

ज्योतिषस्य त्रय:[६] भेदा: प्रचलिता: एव । तेषु त्रिषु प्रभेदेषु सर्वेषां मूलभूतत्वात् सिद्धान्त: अन्यतम: । तद्यथा भास्कराचार्य:-

**जानन् जातकसंहिता स गणितस्कन्धैकदेशा अपि ज्योति:शास्त्रविचार सारचतुरप्रश्नेष्वकिंश्चित्कर:।**
**य: सिद्धान्तमनन्तयुक्तिविततं नो वेत्ति भित्तौ यथा राजा चित्रमयोऽथवा सुघटित: काष्ठस्य कण्ठी रव: ।।**[७]

---

[१] मनुस्मृति: २/७

[२] छन्द: पादौ तु वेदस्य हस्त: कल्पोऽथ कथ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।। पाणीनीय शिक्षा ४१-४२

[३] . आर्षज्योतिष - ३६

[४] . सिद्धान्तशिरोमणि: कालमान श्लो.सं. १२

[५] . सूर्यसिद्धान्तपरिलेखाधिकार श्लो.सं. २४

[६] . सिद्धान्तसंहिताहोरा रूपस्कन्ध त्रयात्मकम् । वेदस्य निर्मलं चक्षु: ज्योतिषशास्त्रमकल्मषम्।। नारद संहिता

[७] .सिद्धान्तशिरोमणि: कालमान श्लो.सं. ७

अत: ज्योतिषज्ञानां कृते सिद्धान्तमवश्यमेवपठनीयम्। सिद्धान्तान्तर्गत-विषयेषु ग्रहणविमर्श: कश्चन महत्त्वपूर्णांश: । ग्रहणस्योपादेता विषये भास्कराचार्य: निगदति- **बहुफलं जपदानहुतादिके स्मृतिपुराणविद: प्रवदन्ति हि ।**

**सदुपयोगि जने स चमत्कृति ग्रहणमिन्द्विनयो: कथयाम्यत: ।।**[१]

कमलाकरोपि- **यत्र स्नानाज्जपाद्धोमाद्दानाच्चेश्वरभक्तित: ।**

**भूमिस्थितो नर: शीघ्रं सर्वपापै: प्रमुच्यते ।।**[२]

ग्राह्यग्राहकयो: अन्तराभावत्वं ग्रहणत्वमिति ग्रहणस्य सामान्यलक्षणम् । परन्तु ग्राहाणां ग्रहणप्रकरणे भवतीयमाशङ्का यत् ग्रहणां पूर्वापरयाम्योत्तरोर्ध्वाधो-रूपगतिभेदत्रये ग्रहणाय किमुपयुक्तम्? समाधानमुच्यते यत् सर्वेषामपि ग्रहणां कक्षा: आकाशे ऊर्ध्वाधोरूपेण समानान्तरा: सन्ति, अत: तयो: ग्राह्यग्राहकयो: मध्ये ऊर्ध्वाधरान्तराभावत्वं न भवितुमर्हति। पुन: केवलं पूर्वापरान्तराभावत्वेऽपि प्रतिपर्वं ग्रहणं न सम्भाव्यते। अत: इदं लक्षणमपि निरस्तम्। अन्ते ग्राह्यग्राहकयो: मध्ये पूर्वापरान्तराभाव-याम्योत्तरान्तराभावो चेद् ग्रहणं भवति। अत: लक्षणमिदं युक्तियुक्तम। ग्रहणप्रसङ्गे प्राय: सूर्यचन्द्रग्रहणौ गृह्यते। अत्रेदानिं चन्द्र ग्रहणमु-पस्थाप्यते। चन्द्रग्रहणे ग्राह्यश्चन्द्र : ग्रहिका भूभा भवति। रविकिरणाभिमुखं गतस्य भूबिम्बस्य विरुद्धदिशि तमोमयी दीर्घा सूची समुत्पद्यते सैव भूभा। सा भूभा दीर्घतया चन्द्रकक्षाम्यतिक्रम्य बहिर्याति। यथोक्तं -

**भानोर्बिम्बपृथुत्वादपृथुपृथिव्या: प्रभा हि सूच्याग्रा ।**

**दीर्घतया शशिकक्षामतीत्य दूरं बहिर्याता ।।**[३]

तासां भूभायां स्वकक्षास्थविमण्डल-गतचन्द्र: यदा स्वगत्या प्रविशति तदा रविकिरणसंयोगाभावात् चन्द्रबिम्बे प्रकाशाभाव: सञ्जायते। तदेव चन्द्रग्रहणम्।

---

[१] . सिद्धान्तशिरोमणि: गणिताध्याय: चन्द्रग्रहणाधिकार: श्लो.सं.१

[२] . सिद्धान्ततत्त्वविवेकः चन्द्रग्रहणाधिकार: श्लो.सं.८९

[३] . सिद्धान्तशिरोमणि: गोलाधयाय: ग्रहणवासना श्लो.सं. ५

एतादृशी स्थिति: पूर्णिमान्ते[१] सम्भवति। तदानीं भूबिम्बादुभयतो रविचन्द्रबिम्बयो: स्थिति: तयो: अन्तरञ्च राशिषट्कमिति । तद्यथा सूर्यसिद्धान्ते-

**तुल्यौ राश्यादिभि: स्याताममावस्यान्तकालिकौ । सूर्येन्दू पौर्णमास्यन्ते भार्धे भागादिभि: समौ ।।**[२]

चन्द्रग्रहणान्तरमिदानीं सूर्यग्रहणं व्याख्यायते। दर्श: सूर्येन्दू संगम: इत्युक्ते अमान्तकाले[३] सूर्येन्दू सर्वावयवेन समौ स्यातामेव। यतोहि प्रतितिथिं सूर्यचन्द्रमसोरन्तरं द्वादशांशमितं भवति। अत: अमान्ते द्वादशगुण: त्रिशंत् षष्टित्रिंशत भवतीति उपपन्नम्। सूर्यग्रहणे सूर्य: ग्राह्यो ग्राहकश्चन्द्र:। आकाशे रविकक्षात: चन्द्रकक्षाय: अधोगतत्वात् सूर्यग्रहणे चन्द्र: रविभूबिम्बयो: मध्यगत: भवति। तदानीं भूप्रदेशस्थ जनानां कृते दृष्टिपथगतचन्द्र: रविदर्शने बाधको भवति। अत: अधोगतचन्द्रबिम्बेनाच्छादितस्य रविबिम्बस्यादर्शनात् सूर्यग्रहणम्। तद्यथा -

**अथैकसूक्ष्मावयवस्थितेश्च रवेरध: शीतकरोस्ति दर्शे ।**
**तदिन्दुनाऽच्छादितमर्कबिम्बं संदृश्यते ग्रस्तमिवात्र लोकै: ।।**[४]

सर्वग्रहणे पञ्चावयवा: भवन्ति। स्पर्श-सम्मिलन-मध्यग्रहण-उन्मीलन-मोक्षश्चेति पञ्चावयवा: भवन्ति। स्पर्शकालात् मोक्षकालपर्यन्तं काल: स्थितिसंज्ञक:। पुन: स्पर्शकालात् मध्यग्रहणं यावत् स्पार्शिकं स्थित्यर्धम्। मध्यग्रहणात् मोक्षकालपर्यन्तं मौक्षिकं स्थित्यर्धं भवति। सम्मिलनकालात् उन्मीलनं यावत् कालखण्डस्य विमर्दसंज्ञा भवति। सम्मिलनकालात् मध्यग्रहणं यावत् स्पार्शिकं विमर्दाधं भवति। मध्यग्रहणात् उन्मीलनान्तं यावत् मौक्षिकं विमर्दाधं भवति। यथोक्तं सूर्यसिद्धान्ते-

**स्फुटतिथ्यावसाने तु मध्यग्रहणमादिशेत् । स्थित्यर्धनाडिकाहीने स्पर्शो मोक्षस्तु संयुते ।।**
**तद्वदेव विमर्दाधनाडिका हीनसंयुते । निमीलनोन्मीलनाख्ये भवेतां सकलग्रहे: ।।**[५]।।इति

---

[१] . अथात्र षड्भान्तरितौ लवाद्यैस्तुल्यौ स्फुटौ सूर्यविधू यदा स्त: ।
स पूर्णिमान्तोऽस्त्यसकृत्स एव चन्द्रग्रहार्थं प्रथमं प्रसाध्य: ।। सिद्धान्ततत्त्वविवेक: चन्द्रग्रहणाधिकार: श्लो. सं. १

[२] . सूर्यसिद्धान्ते चन्द्रग्रहणाधिकारे श्लो. सं. ७

[३] .अथात्र भाद्यावयवेन तुल्यौ यत् कालिकौ सूर्यविधू स्फुटौ स्त ।
अमान्तसंज्ञोऽस्ति स एव विज्ञैरर्कग्रहार्थं प्रथमं प्रसाध्यः सिद्धान्ततत्त्वविवेक: सूर्यग्रहणाधिकार: श्लो. सं. ५

[४] . सिद्धान्ततत्त्वविवेक: सूर्यग्रहणाधिकार: श्लो. सं. १

[५] सूर्यसिद्धान्ते चन्द्रग्रहणाधिकारे श्लो. सं. १६-१७

# जातकफलादेशप्रसंगे पञ्चवर्गीबलस्य भूमिका

**वेदप्रकाशपाठकः**
शास्त्री- फलितज्योतिषम्

संस्कृतवाङ्गमयस्य विपुलं क्षेत्रमस्ति। अस्य निधिभूतो वेदःसर्वतः प्राचीनः। अस्य शिक्षादीनि षडङ्गानि सर्वजन विदितानि सन्ति[१]। तद्यथा- शब्दशास्त्रं वेदस्य मुखं, ज्योतिषं चक्षुषी, निरुक्तं श्रोत्रमुक्तं, कल्पः करौ, शिक्षा वेदस्य नसिका, पादपद्मद्वयं छन्दः प्रसिद्धो विद्यते[२]। अत्र षट्ष्वङ्गेषु नेत्रस्य प्राधान्यत्वात् षट्शास्त्रेषु ज्योतिषस्य प्राधान्यं स्वाभाविकमेव[३]। यथा दीपकं विना तमसि स्थितानां पदार्थानां ज्ञानं न भवति तथैव ज्योतिषशास्त्रं विना भूत-भविष्य-वर्त्तमानकालिकघटनानां ज्ञानमसम्भवम्।

ज्योतिषशास्त्रं गणित-फलितप्रभेदाभ्यां द्विविधं कल्पितमाचार्यैः। तत्र गणितप्रभेदस्य सिद्धान्तः अपरं नाम। स्कन्धेऽस्मिन् त्रुट्यादितः प्रलयान्तं यावत् समग्रस्य कालखण्डस्य गणनाविधिः प्रदर्शितो विद्यते[४]। स्कन्धस्यास्य अध्ययनेन पञ्चाङ्गसम्बन्धितस्य समग्रगणितस्य ज्ञानं भवति। युगवर्षायनर्त्तुमासदिन-घट्यादीनां सूक्ष्मातिसूक्ष्मं ज्ञानं तथा विविधव्रतपर्वोत्सवादीनां ज्ञानम् अस्य स्कन्धस्य अध्ययनं विना ज्ञातुं न शक्यते। अस्य मौलिको ग्रन्थः सूर्यसिद्धान्तः अद्यत्वेऽपि समेषां सिद्धान्तजिज्ञासूनां मार्गदर्शनं करोति। फलितप्रभेदे संहिता-

---

१. शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः। ज्योतिषामयनं चैव वेदांगानि षडेव तु।। पा. शि. -४१

२. पाणिनि शिक्षा - ४२

३. यथा शिखा मयूराणां नागानां मणयो यथा।
तदवद्वेदांग शास्त्राणां ज्योतिषं मूर्ध्नि संस्थितम्।। वेदांगज्योतिषम् - श्लोक -५

४. बृहत्संहिता- १/९

होरास्कन्धयोः समाहारो विद्यते । संहितायान्तु यत्र समग्रस्य चराचरस्य समष्टिगत-शुभाशुभफलानां विश्लेषणं वर्तते तत्रैव होरायां व्यष्टिगतफलानां विचारो विधीयते । होराशब्दस्य निष्पत्तिः अहोरात्रशब्दस्य आद्यन्तवर्णयोर्लोपाद् भवति ।[१] जन्मकालाज्जन्मपत्रं निर्माय तद्वशात् जातकस्य आपञ्चत्वं यावत् सर्वं शुभाशुभं फलं विचारितं भवति । होराशास्त्रस्य मानवजीवने अत्यधिकं महत्त्वं वर्तते [२]। विषयेऽस्मिन् सत्यमेव उक्तं श्रीमता कल्याणवर्मणा[३]-

**अर्थार्जने सहायः पुरुषाणामापदार्णवे पोतः ।**
**यात्रासमये मन्त्री जातकमपहाय नास्त्यपरः ।।**

अर्थाज्ज्योतिषशास्त्रस्य फलितप्रभेदान्तर्गतः होरास्कन्धः अर्थार्जने सहायं करोति। आपत्तिकाले संरक्षणं करोति। यात्रासमये मत्रीवत् मार्गदर्शनं करोति। इत्थं सर्वकल्याणकरं जातकशास्त्रमपहाय अन्यत् शास्त्रं नास्ति यत् एतादृशं साहाय्यं कुर्यात्। अतः अस्माकं जीवने ज्योतिषशास्त्रस्य महत्त्वमुपादेयता पदे पदे वर्तत एव। अखिलब्रह्माण्डे सर्वेषु शास्त्रेषु ज्योतिषशास्त्रस्य एकं विशिष्टं स्थानमस्ति। ज्योतिष-शास्त्रमेकम् अद्भुतं शास्त्रमस्ति येन मानवानां भूत-भविष्यत्- वर्त्तमानकालिकं ज्ञानं प्राप्यते। यदा कस्यचिज्जातकस्य जन्म भवति तत्समये अन्तरिक्षे ग्रहाणां या स्थितिः भवति तस्याः स्थित्याः उल्लेखो जातकस्य जन्मपत्रकायां भवति। अस्य जातकस्य जन्मकालिकग्रहाणां प्रभावः जातकस्य जीवने आपञ्चत्वं पतति। जन्मपत्रस्थाः सूर्यादयो नवग्रहाः जातकस्य जीवनं स्वीयबलेन प्रभावयन्ति। ग्रहाणां बहुविधबल-निर्द्धारणं जातकग्रन्थेषु प्राप्यते। तेषु पञ्चवर्गीबलं महन्महत्त्वाधायकं वर्तते।

---

[१]. होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात् ।
कर्मार्जितं पूर्वभवे सदादि यत्तस्य पंक्तिसमाभिव्यनक्ति ।। बृहज्जातकम्- १/३

[२] . विधात्रा लिखिता यासौ ललाटेक्षरमालिका।
दैवज्ञस्तां पठेद्व्यक्तं होरानिर्मलचक्षुषा ।। सारावली - २/१

[३] . सारावली - २/५

प्रकृतेऽस्मिन् प्रसङ्गे पञ्चवर्गीबलविषये विचारो विधास्यते। पञ्चवर्गीबलेषु ग्रहाणां पञ्चविधबलनिर्द्धारणं भवति। पञ्चवर्गीबलेषु गृह- हद्दा- द्रेष्काण- नवांश-उच्चबलानां गणना भवति। बलनिर्द्धारणप्रसङ्गे एतेषां ग्रहबलानां मूल्यनिर्द्धारणमपि संख्या-माध्यमेन कृतमस्ति। तद्यथा[१]-

**त्रिंशत् स्वभे विंशतिरात्मतुङ्गे हद्देक्षचन्द्रादशकं दृक्काणे ।**
**मुसल्लहे पञ्चलवाः प्रदिष्टा विंशोपका वेदलवैः प्रकल्प्या।।**

अर्थात् कोपि ग्रहः स्वगृहे भवति तदा 30 बलं, स्वहद्दायां 25, स्वद्रेष्काणे 10 बलं, स्वनवांशे भवति तदा 5 बलं भवति। अत्रापि कश्चित् सूक्ष्मविचारः नीलकण्ठदैवज्ञेन प्रतिपादितः। तद्यथा[२]-

**स्वस्वाधिकारोक्तबलं सुहृद्धे पादोनमर्धं समभेरिभेङ्घ्रिः ।**
**एवं समानीयबलं तदैक्ये वेदोद्धृते हीनबलः शरोनः ।।**

अर्थात् विचारितो ग्रहः यदि स्वसुहृद्राशौ अवस्थितो भवति तदा पूर्णबलीं, स्वसमराशौ अवस्थितो भवति तदा अर्धबली भवति। शत्रुराशौ अवस्थितो भवेत्तदा चतुर्थांशं बलं भवति। एतद् बलं यदि 5 तः अल्पं भवेत्तदा हीनबली, ततोऽधिकं 10 तो न्यूनं भवेत्तदा मध्यबली, ततोऽग्रे 20 तो न्यूनं यावद् ग्रहस्य बलं स्यात् तदा ग्रहः पूर्णबली उच्यते।

---

१. ताजिकनीलकंठी - ३९

२. ताजिकनीलकंठी - ४०

## लखनऊपरिसरीय-ज्योतिष-विभागस्य गतिविधयः




उत्तरप्रदेशस्य राजधान्यां लखनऊ लक्ष्मणपुरी नामके नगरे अवस्थितोऽयं राष्ट्रिय-संस्कृत-संस्थानस्य लखनऊपरिसरः स्वस्थापनादिवसात् २अगस्त१९८६ दिनाङ्कात् भारतीयां संस्कृतिमभि-रक्षयन् संस्कृतप्रचार-प्रसारादिषु क्षेत्रेषुमहदवदानं कुर्वन् महानगरे अवस्थितोऽपि दशएकड़परिमितेन क्षेत्रफलेन गोमतीनद्याः तटे विलसन् सज्जनानाकर्षयन् संस्कृतच्छात्राणां मनोकामनां पूरयन् निरन्तरमग्रेसरो वर्तते ।



अस्मिन् परिसरे 1995 तमस्य ख्रिस्ताब्दस्य दिसम्बरमासे श्रीमताम् आचार्यसर्वनारायणझा-महोदयानामागमनेन ज्योतिष-विभागस्यारम्भः सञ्जातः। एतेषां कार्यकालः दिसम्बर 1995 तः मई 2011 यावत् आसीत्। एतेषा-मागमनानन्तरं ज्योतिषशास्त्रस्य सम्यक् प्रचारः प्रसारश्च सञ्जातः। बहवः छात्राः ज्योतिषाचार्योपाधिं

विद्यावारिध्युपाधिश्च सम्प्राप्य देशस्य विभिन्नेषु प्रभागेषु ज्योतिषशास्त्रस्य प्रचार-प्रसारादिकर्मणि शास्त्राध्यापनादि कर्मणि च संलग्नाः विद्यन्ते ।

संस्थानस्य लखनऊ-परिसरेऽस्मिन् फलितज्योतिषस्य गणितज्योतिषस्य च सम्यक् अध्यापनं भवति। द्वयोः विभागयोः मेधाविनः छात्राः अध्ययन-लेखनादिकर्मसु अग्रसराः वर्तन्ते। सिद्धान्तज्योतिषशास्त्रस्य सविधि-अध्ययन- अध्यापन- निमित्त माधुनिक- यन्त्राणां सङ्कलनाय प्रस्तावः मुख्यालये प्रेषितो विद्यते। तेषु दूरवीक्षणयत्रम् **2016-17** सत्रेऽस्मिन् ज्योतिष विभागेन सम्प्राप्तम्। अनेन यत्रमाध्यमेन छात्राः अध्यापकाश्च ग्रह-नक्षत्रैश्च वेधविधिना परिचिताः भविष्यन्ति।




**<u>विभागीयाचार्याणां नामानि</u> –**

इदानीं लखनऊपरिसरे ज्योतिषविभागे पञ्च अध्यापकाः वर्तन्ते। इमे राष्ट्रियसंस्कृत-संस्थानस्य विविधपरिसरेषु बहुवर्षेभ्यः सेवां प्रदाय परिसरेऽस्मिन् ज्योतिष विभागे समागताः सन्ति । तेषां नामानि तथा परिसरेऽस्मिन् कार्यभारग्रहणतिथिः-

| नाम | पदम् | कार्यभारग्रहणतिथिः |
|---|---|---|
| 1. प्रो. मदनमोहनपाठकः | आचार्योऽध्यक्षश्च | 06 जून 2011 तः |
| 2. डॉ.अमितकुमारशुक्लः | सहायकाचार्यः | 28- मई - 2009 तः |
| 3. डॉ. उमेशकुमारपाण्डेयः | सहायकाचार्यः (संविदा) | 21 जून 2011 तः |

| | | |
|---|---|---|
| 4. डॉ. (श्रीमती) चन्द्रश्रीपाण्डेयः | सहायकाचार्या(संविदा) | १ अगस्त २०१२ तः |
| 5. डॉ. नरेशशर्मा | सहायकाचार्यः (संविदा) | ०३ जुलाई २०१८ |

अस्मिन् परिसरे ज्योतिषशास्त्रं पठितुं देशस्य विविधेभ्यः प्रान्तेभ्यः पिपठिषवः छात्राः अध्ययनं विधाय स्वीयं जीवनं सफलीकुर्वन्ति। ज्योतिषविभागे विषयद्वयोः फलित-गणितयोः सम्यक् अध्यापनं विभागीयाध्यापकैः सोत्साहं क्रियन्ते। प्रतिवर्षं बहवः छात्राः आचार्यकक्षोत्तीर्णतां सम्प्राप्य विविधउद्योगद्वारा जीवनं यापयन्ति। केचन छात्राः शास्त्रेऽस्मिन् शोधकार्यमपि कुर्वन्ति। अत्र प्रतिकक्षं छात्राणां संख्या निम्नलिखिताः विद्यन्ते। तद्यथा-

| **कक्षा** | **फलितज्योतिषे** | | | **सिद्धान्तज्योतिषे** | | |
|---|---|---|---|---|---|---|
| **लिङ्गम्** | **पु.** | **स्त्री.** | **योगः** | **पु.** | **स्त्री** | **योगः** |
| प्राक्शास्त्रिप्रथमवर्षे | 08 | 00 | **08** | - | - | **-** |
| प्राक्शास्त्रिद्वितीयवर्षे | 02 | 00 | **02** | - | - | **-** |
| शास्त्रिप्रथमवर्षे | 09 | 00 | **09** | 1 | 1 | **02** |
| शास्त्रिद्वितीयवर्षे | 02 | 00 | **02** | 03 | 00 | **03** |
| शास्त्रितृतीयवर्षे | 04 | 00 | **04** | 01 | 00 | **01** |
| आचार्यप्रथमवर्षे | 05 | 00 | **05** | - | - | **-** |
| आचार्यद्वितीयवर्षे | 05 | 02 | **07** | 03 | 00 | **03** |
| **योगः-** | | | **37** | | | **09** |
| **कुलयोगः-** | | | | | | **46** |

<u>**२०१३-१४ शिक्षासत्रतः शोधच्छात्राणां सूची-**</u>

| **शोधार्थीनाम**<br>शोध-पञ्जीयनसंख्या<br>आधारसंख्या | **पञ्जीयन-दिनांकः** | **शोधशीर्षकः** | **नियमितः/ स्वतत्रः** | **मार्गदर्शक-नाम** |
|---|---|---|---|---|
| 1.उमाकान्ततिवारी<br>पं.सं.15684<br>आ. सं-<br>519177785542 | 14 फर.2014<br>शोधप्रबन्ध **समर्पित** -दि. १६/७/२०१९ | शुभाशुभफलनिर्धारणे सामुद्रिक-शास्त्रस्य प्रायोगिकमनुशीलनम् | स्वतत्रः<br>**शोध-प्रबन्ध-समर्पितः**<br>१६/७/२०१९ | प्रो. मदन मोहन पाठकः |
| 2.शैलेशकुमारतिवारी<br>पं.सं.15710<br>आ.सं.4569151624 | 25फर.2014<br>**उपाधि प्राप्तः** | ज्योतिषशास्त्रदृष्ट्या मानसिकरोगस्य प्रायोगिकमध्यनम् | नियमितः | प्रो. मदन मोहन पाठकः |
| 3.अभयत्रिपाठी<br>पं.सं. 16797<br>आ.सं.900964669076 | 29दिस.2014 | मयमतसमरांगणसूत्र-धारयोः देवालयसन्दर्भे तुलनात्मकमध्ययनम् | स्वतत्रः | डॉ.अमित कुमार शुक्लः |
| 4. कु. चित्राश्रीवास्तव<br>पं. सं.16799<br>आ.सं. 605983031541 | 29अप्रै.2014 | प्रशासकीययोगानां ज्योतिषशास्त्रदृष्ट्या अध्ययनम् | नियमितः | डॉ. अमित कुमार शुक्ल |
| 5.सुधीरकुमारत्रिवेदी<br>पं.सं.17123<br>आ.सं. | 01जन.2015 | सिन्धुराजवधम् इति महाकाव्यस्य समीक्षात्मकमध्ययनम् | स्वतत्रः | प्रो. मदन मोहन पाठकः |
| 6.शत्रुघ्नपाण्डेयः | 20जन.2015 | ज्योतिषशास्त्रोक्तानाम् | नियमितः | डॉ.अमित |

| | | | | |
|---|---|---|---|---|
| पं.सं. 18395<br>आ.सं.223748076114 | | अरिष्टयोगानां विश्लेषणात्मकमध्ययनम् | | कुमार शुक्लः |
| 7. सरिता शुक्ला<br>पं.सं. 17115<br>आ.सं. | 1 जन. 2015 | डॉ. प्रशस्यमित्रशास्त्रिणः कथासाहित्यिकसमीक्षात्म - कमध्ययनम् | नियमितः | डॉ.अमित कुमार शुक्लः |
| 8. वैङ्कटेश्वरपाण्डेयः<br>पं.सं.- 432<br>आ.सं. 787630647902 | २१ सितम्बर २०१७ | आदितस्त्रिप्रश्नाधिकार पर्यन्तं सूर्यसिद्धान्तस्य समीक्षात्मकमध्ययनम् | नियमितः | प्रो. मदन मोहन पाठकः |
| 9. सन्तोषपाठकः<br>पं.सं.<br>आ.सं. 530087662083 | २१ सितम्बर २०१७ | कमलाकरभटदृष्ट्या सूर्य-चन्द्रग्रहणयो-स्तुलनात्मकमध्ययनम् | नियमितः | प्रो. मदन मोहन पाठकः |
| 10. अभयकुमारपाण्डेय<br>पं.सं.<br>आ.सं. ९२२२७४९४२९९८ | १० अगस्त २०१७ | कृषिपाराशरस्य समीक्षात्माकमध्ययनम् | नियमितः | प्रो. मदन मोहन पाठकः |
| 11. अमितकुमारमिश्रः<br>पं.सं.<br>आ.सं. ३४००३९२६७१८७ | ०७ अगस्त २०१७ | जन्मांगचक्रे विदेशगमनयोगानां सर्वेक्षणात्मकमध्ययनम् | नियमितः | प्रो. मदन मोहन पाठकः |

**<u>भास्कराचार्यपरिषद्-</u>**

छात्राणां सर्वमुखीविकासाय विभागेऽस्मिन् प्राध्यापकानां छात्राणाञ्च मनोयोगेन भास्कराचार्यपरिषदः परिकल्पना कृता विद्यते। यस्यां परिषदि मासे पूर्वसूचनानुसारं वारद्वयं छात्राः अध्यापकानां निर्देशने एकत्र सम्भूय भाषणादिना स्वाधीतस्य विषयस्य परिमार्जनं कुर्वन्ति। अस्यां परिषदि विभागीयाध्यापकानामपि क्रमशः व्याख्यानं भवति। अनेन छात्राः लाभान्विताः भवन्ति।

**ज्योतिषपरिचयपाठ्यत्रमस्य उद्घाटनम्-**







सर्वसामान्याः जनाः अपि ज्योतिषशास्त्रं जानीयुस्तदर्थं त्रैमासिकज्योतिष परिचय-पाठ्यत्रमस्य आयोजनं प्रति सत्रं प्रचलति। सत्रेऽस्मिन् २४ अक्तूबर 2018 दिनाङ्के कार्यक्रमस्य चतुर्दश-चक्रस्य शुभारम्भः सञ्जातः। कार्यक्रमेऽस्मिन् परिसरस्य प्र.प्राचार्याः प्रो. विजयकुमारजैनमहोदयाः भारतीय-प्रशासनिक-सेवायाः वरिष्ठाधिकारिणः श्रीमन्तः जयप्रकाशत्रिपाठी महाशयाः, मुख्यातिथि रूपेण का.सि.सं.वि.वि. दरभंगायाः कुलपतयः प्रो. सर्वनारायणझा महोदयाः, पाठ्यक्रमसंयोजकाः प्रो. मदनमोहनपाठकमहोदयाश्च उपस्थिताः आसन्। ऊपर्युक्तैः सर्वैरपि मनीषिभिः पाठ्यक्रमस्यास्य माहात्म्यं प्रतिपादिताः। ज्योतिषपरिचयपाठ्यक्रमस्य चतुर्दशचक्रस्य सत्रेऽस्मिन्

जिज्ञासूनां संख्या एकविंशतिः २१ आसीत्। अत्र कार्यक्रमेऽस्मिन् सामान्याः नागरिकाः, बैंककर्मिणः, सुरक्षाकर्मिणः, चिकित्सकाः, अभियन्तारः, विभिन्नविभागीयाधिकारिणः, विविधव्यवसायिनः, नेतृगणाः, पौरोहित्यकर्मरताः, अन्ये सामाजिकाः ज्योतिषज्ञानेन लाभान्विताः भवन्ति।

**<u>ज्योतिषविभागे व्याख्यानस्य आयोजनम्- ३० मार्च २०१९</u>**



ज्योतिषशास्त्रस्य प्रचार-प्रसारोद्देश्यनिमित्तं देहलीमुख्यालयस्य आदेशेन अस्मिन् सत्रे लखनऊपरिसरस्य ज्योतिष विभागेन ३० मार्च २०१९ दिनाङ्के विशिष्ट व्याख्यानस्य आयोजनं कृतम्। विशिष्टव्याख्यान कर्तारूपेण श्रीजगद्गुरुरामानन्दाचार्यराजस्थान-संस्कृत-विश्वविद्यालयस्य ज्योतिषविभागस्य आचार्याः अनुसन्धान-विभागस्य निदेशकाश्च प्रो. विनोदकुमार-शर्ममहोदयाः समुपस्थिताः आसन्। साम्प्रतिकेऽस्मिन् परिवेशे ज्योतिषशास्त्रस्य महनीयं योगदानमिति विषयमवलमब्य गुरुत्वपूर्णमभिभाषणं प्रदत्तवन्तः। तत्र समुपस्थिताः छात्राः, गवेषकाः, नागरिकाश्च उपकृताः सञ्जाताः।



**<u>ज्योतिषविभागे सङ्गोष्ठ्या आयोजनम्- (२९-३० मार्च २०१९)</u>**

ज्योतिषशास्त्रस्य प्रचार-प्रसारोद्देश्यनिमित्तं देहली- मुख्यालयस्य आदेशेन सत्रेस्मिन् लखनऊपरिसरस्य

ज्योतिषविभागे वर्तमानसन्दर्भे ज्योतिषशास्त्र- स्योपादेयता इति विषयमवलम्ब्य दिनद्वयव्यापिन्याः संगोष्ठ्याः आयोजनं २९-३० मार्च २०१९ दिनाङ्कयोः सञ्जातम्। कार्यक्रमस्य उद्घाटनसत्रेऽस्मिन् देशस्य विशिष्ट- ज्योतिषशास्त्रस्य ख्यातिमन्तः धुरन्धराः आचार्याः स्वविचारान् उपस्थापितवन्तः। तेषु काशीहिन्दूविश्वविद्यालयस्य ज्योतिषविभागस्य आचार्याः प्रो.चन्द्रमौलीउपाध्यायवर्याः, डा.सुभाषपाण्डेयवर्याः, प्रो.उमाशंकरशुक्लवर्याः (भू.पू संकायाध्यक्षः सं.सं.वि.वि. वाराणसी), डा. श्यामदेवमिश्रवर्याः राष्ट्रियसंस्कृतसंस्थानस्यभोपालपरिसरस्याचार्याः, जयपुरतः श्रीजगद्गुरुरामानन्दाचार्यराजस्थान-संस्कृत-विश्वविद्यालयस्य ज्योतिष- विभागस्य आचार्याः अनुसन्धान-विभागस्य निदेशकाश्च प्रो. विनोदकुमारशर्ममहोदयाः, मुख्यातिथिरूपेण भारतीयपुलिससेवायाः वरिष्टाधिकारिणः श्री अशोककुमारधरद्विवेदि-महोदयाः, लखनऊविश्वविद्यालयस्य संस्कृतविभागस्य आचार्याः प्रयागनारायणमिश्र-महाभागाः मुख्याः आसन् ।




संगोष्ठयाः सम्पूर्तिसत्रे विलसन्ति वामतः सभा-संचालाकाः डा. अमितकुमार-शुक्लवर्याः, प्रशासनिक-सेवायाः अधिकारिणः श्रीजयप्रकाशत्रिपाठीवर्याः, संस्थानस्य भू.पू. प्राचार्याः प्रो. सुरेन्द्रझावर्याः, लखनऊविश्व-विद्यालयस्य संस्कृत एवं ज्योतिषविभागाध्यक्षाः पद्मश्री बृजेशकुमारशुक्लवर्याः, भारतीयपुलिससेवायाः अधिकारिणः श्रीध्रुवकान्तठाकुरवर्याः, कार्यक्रमसंयोजकाः प्रो.मदनमोहनपाठकवर्याः उपस्थिताः सन्तः स्वीयसारगर्भितेन व्याख्यानेन कार्यत्रमस्य शोभामभिवर्धितवन्तः एवञ्च समुपस्थितेभ्यः सदस्येभ्यः ज्ञानामृतं वितरितवन्तः।


**<u>श्रीजगन्नाथपञ्चाङ्गस्य लोकार्पणम्-</u>**

राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरस्य ज्योतिष विभागेन समायोजितायाः अखिल-भारतीय-ज्योतिष सङ्गोष्ठ्या समापनसत्रे ३० मार्च २०१९ दिनाङ्के २०७६ वित्रमाब्दस्य श्रीजगन्नाथ- पञ्चाङ्गस्य लोकार्पणम् सञ्जातम्। अस्मिन् कार्यत्रमे मञ्चस्थाः सन्ति वामतः. श्रीजयप्रकाश-त्रिपाठीवर्याः,पू.प्राचार्या प्रो. सुरेन्द्रझावर्याः, प्रो.वृजेशकुमार-शुक्लमहोदयाः, श्रीमन्तः ध्रुवकान्ठाकुर (I.P.S.) महोदयाः,पञ्चाङ्गसम्पादकाः प्रो. मदनमोहनपाठकमहोदयाः, श्रीमन्तः तेजस्करपाण्डेय (P.C.S.) महोदयाः। एवञ्च सभायामासन् अन्ये गणमान्याः आचार्याः, छात्राः नागरिकाश्च।



**<u>भास्करोदयपत्रिकायाः चतुर्दश-अंकस्य लोकार्पणम्-</u>**

अस्मिन् सम्पूर्त्ति-सत्रे मञ्चे दक्षिणतः विलसन्तः सन्ति **I.C.P.R.** इति संस्थायाः निदेशिका: डॉ. पूजाव्यास-वर्याः, का.सि.सं.वि.वि. दरभंगायाः कुलपतयः प्रो.सर्व नारायणझामहोदयाः, प्र.प्राचार्याः प्रो. विजयकुमार-



जैनवर्या:, श्रीब्रजेशपाठकवर्या: (ऊ.प्र. विधिमंत्री), प्रो. शिशिरकुमारपाण्डेयवर्या:, ज्योतिषविभागाध्यक्षाः प्रो.मदनमोहनपाठक महोदयाः। कार्यक्रमेस्मिन् ज्योतिष-परिचय पाठ्यक्रमस्य चतुर्दश चक्रस्य अध्येतृणां प्रमाण-पत्रवितरणमपि जातम्।

**पुरातनछात्रपरिषद् :-**

अस्मिन् सत्रे राष्ट्रिय-संस्कृत-संस्थानमुख्यालयस्य निर्देशानुसारं लखनऊ-परिसरस्य ज्योतिष-विभागीयपुरातनछात्र-परिषद: संघटनं जातम्। ज्योतिषविभागे वर्तमानसन्दर्भे ज्योतिष-शास्त्रस्योपादेयता इति विषयमवलम्ब्य २९-३० मार्च २०१९ दिनाङ्कयो: दिनद्वय-व्यापिन्याः संगोष्ठ्या: समापनावसरे केषाञ्चन ज्योतिष- विभागीय पुरातनछात्राणां परिचयपुरस्सरं सम्माननं सञ्जातम्। उपरि चित्रे सन्ति वामतः डा. शैलेशकुमार-तिवारी, डा. नरेशशर्मा, श्रीमतीअल्पनानिगम, श्रीमतीकुंकुमजेटली, डा. नीलमपाण्डेय, डा. चन्द्रश्री-पाण्डेय:, डा.श्यामदेवमिश्र महोदयाश्च।






२०१८-२०१९ सत्रे संस्कृत-संस्कृति-संरक्षण-संवर्धन-सम्बन्धि-विभिन्न कार्यक्रमेषु **सम्पादकस्यावदानविषयक-कानिचिच्छाया चित्राणि-**

८ मार्च २०१९ दिनांके लक्ष्मणपुरस्य वेदानन्दाश्रमे समायोजितस्य द्वितीय-सामूहिक-उपनयन-संस्कारस्य छायाचित्रम्-



४ अप्रैल २०१९ दिनांके काशीहिन्दूविश्वविद्यालये वास्तुशास्त्रदिशा एवं दशा विषयक-अखिलभारतीय-ज्योतिष-शास्त्रसंगोष्ठ्यां मुख्यातिथिरूपेण अंश-ग्रहणस्य छायाचित्रम्




२९ अप्रैल २०१९ दिनांके श्रीबैकुण्ठनाथपवहारी-संस्कृतमहाविद्यालये देवरिया-उत्तरप्रदेशे ज्योतिष-वास्तु-कर्मकाण्ड-विषयक-राष्ट्रियकार्यशालायां व्याख्यानम्-



## भास्करोदयपत्रिकायाः सप्तम-अङ्कस्य लोकार्पणम् :-



सप्तम -अङ्कस्य गरली -परिसरे लोकार्पणं कुर्वन्तः नवदेहलीस्थितस्य राष्ट्रियसंस्कृतसंस्थानस्य निदेशकचराः श्रीमन्तः डॉ.कमलाकान्तमिश्रमहोदयाः पार्श्वे सन्ति गरलीपरिसरस्य प्राचार्याः प्रो.सुरेन्द्रझामहोदयाः एवञ्च आचार्याः रामदेवझामहोदयाः, आचार्याः रामनारायणदासमहोदयाः, पत्रिकासम्पादकःडॉ.मदनमोहनपाठकश्च

**दिनाङ्कः- २२ फरवरी २००९ स्थानम्- रा.सं.संस्थानम्, गरली-परिसरः**

---

## भास्करोदयपत्रिकायाः त्रयोदश-अङ्कस्य लोकार्पणम् :-



**भास्करोदयपत्रिकायाः त्रयोदशअङ्कस्य लोकार्पणं कुर्वन्तः भारतसर्वकारस्य माननीयगृहमन्त्रिणः श्रीमन्तःराजनाथसिंहमहोदयाः, पार्श्वे विलसन्ति प्रो. शिशिरकुमारपाण्डेयः, डॉ. उमेशचन्द्रपाण्डेयः, प्रो. रामसागरमिश्रमहोदयाश्च**

**दिनाङ्कः - २२ नवम्बर २०१६ शनिवासरः, लखनऊ**

---

## भास्करोदयपत्रिकायाः चतुर्दश-अङ्कस्य लोकार्पणम् :-



**भास्करोदयपत्रिकायाः चतुर्दश-अंकस्यं लोकार्पणं कुर्वन्तः विलसन्ति दक्षिणतः ICPR इति संस्थायाः निदेशिकाः डॉ. पूजाव्यासमहोदयाः, का.सिं.द.सं. विश्वविद्यालयस्य कुलपतयः प्रो. सर्वनारायणझामहोदयाः, प्रभारिप्राचार्याः प्रो. विजयकुमारजैनमहोदयाः, उ.प्र.शासनस्य विधिमन्त्रिणः मा. ब्रजेशपाठकमहोदयाः, परिसरस्य वरिष्टाचाष्टाचार्याः प्रो.शिशिरकुमारपाण्डेयमहोदयाः पत्रिकासम्पादकाः प्रो. मदनमोहनपाठकमहोदयाश्च।**

**दिनाङ्कः - ०८ अप्रैल २०१७ शनिवासरः, लखनऊ**

गोवंशस्य परिरक्षणं कुरु। राष्ट्रस्य परिवर्धनं कुरु।।



## भास्करोदयनामिकायाः ज्योतिष-शोधपत्रिकायाः विगताङ्काः-



ISSN No.:2278-0815